

कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः


Checked 2014
कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M748
विषय वैदिक
नाव. रुद्रपद्धति (Mss)
लेखक/लिपीकार
पृष्ठ 96
काळ
पूर्ण/अपूर्ण

॥ अथ रुद्रपद्धतिप्रारंभ ॥ श्रीत्र्यंबकप्र० ॥

रुद्र
१

॥श्रीगणेशायनमः॥ ॥नमामिपार्वतीसूनुंभक्त्यानांसिद्धिदायकं॥रु
द्रकर्मविधातॄणांचतुर्वर्गफलप्रदम्॥१॥दीक्षितानांतवित्तेनविश्वनाथस्य
सूनुना॥रच्यतेसुखबोधायरुद्रपद्धतिरादरात्॥२॥श्रीकुलदेव्यैनमः॥सुमु
खश्चैकदंतश्चकपिलोगजकर्णकः॥लंबोदरश्चविकटोविघ्ननाशोगणाधि
पः॥१॥धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः॥द्वादशैतानिनामानियःप
ठेच्छृणुयादपि॥२॥विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा॥संग्रामेसंकटे
चैवविघ्नस्तस्यनजायते॥३॥शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं॥प्रसन्न
वदनंध्यायेत्सर्वविघ्नोपशांतये॥४॥अभीप्सितार्थसिध्यर्थंपूजितोयःसु
रासुरैः॥सर्वविघ्नहरेतस्मैश्रीगणाधिपतयेनमः॥५॥सर्वमंगलमांगल्ये

प०

१

शिवेसर्वार्थसाधिके॥शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते॥६॥सर्व
दासर्वकार्येषुनास्तितेषाममंगलं॥येषांहृदिस्थोभगवान्मंगलायतनंह
रिः॥७॥तदेवलग्नंसुदिनंतदेवताराबलंचंद्रबलंतदेव॥विद्याबलंदैवब
लंतदेवलक्ष्मीपतेतेंघ्रियुगंस्मरामि॥८॥यत्रयोगेश्वरःकृष्णोयत्रपार्थो
धनुर्धरः॥तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम॥९॥सर्वेष्वारंभकार्ये
षुत्रयस्त्रिभुवनेश्वराः॥देवादिशंतुनःसिद्धिंब्रह्मेशानजनार्दनाः॥१०॥वि
ष्णोः॥३॥श्रीमद्भगवतोमहापुरुषस्यविष्णुराज्ञयाप्रवर्तमानस्यअद्यब्र
ह्मणोद्वितीयपरार्द्धेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरेअष्टाविंशतितमे
कलियुगेप्रथमचरणेभरतवर्षेभरतखंडेजंबुद्वीपेआर्यावर्तांतर्गताvि

रुद्र
२

प.

मुक्तवाराणसीक्षेत्रे आनंदवनेमहाश्मशानेगौरीमुखेत्रिकंटकविराजिते
भागीरथ्याः पश्चिमेतीरेकुमारिकाक्षेत्रे अमुकसंवत्सरे अमुकायने अमुक
र्तौ अमुकमासि अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमु
कराशिस्थितेचंद्रे अमुकराशिस्थितेरवौ अमुकराशिस्थितेदेवगुरौशे
षेषुग्रहेषुयथास्थानस्थितेषुसत्सुएवंगुणविशेषणविशिष्टायांपु
ण्यतिथौशुभतिथौच अमुकफलसिद्धिद्वाराश्रीविश्वेश्वरप्रीत्यर्थंमहा
रुद्राख्यादिकर्म्मकरिष्ये॥ कर्म्मणोनिर्विघ्नतासिध्यर्थं गणेशपूजनंस्व

२

स्तिवाचनंमातृकापूजनंनांदीश्राद्धं आचार्यब्रह्मऋत्विग्ववरणंचक
रिष्ये॥ इतिसंकल्पगणपतिंपूजयेत्॥ ॥गणानांत्वागणपतिंहवामहेक

विंकवीनामुपमश्रवस्तमम्॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पत आनःशृण्व
न्नूतिभिःसीदसादनं॥ ऋद्धिबुद्धिसहितंगणपतिं आवाहयामि॥ गण
पतयेनमः आसनं। पाद्यं। अर्घ्यं। आचमनीयं। मधुपर्कं। पंचामृतस्ना
नं०॥ शुद्धोदकस्नानं। वस्त्रं। यज्ञोपवीतं। आभरणं। गंधं। पुष्पाणि। धू
पं। दीपं। नैवेद्यं। आचमनीयं। फलं। तांबूलं। दक्षिणा। गणानांत्वा०॥ नि
षुसीदगणपतेगणेषुत्वामाहुर्विप्रतमंकवीनां। नऋतेत्वत्क्रियतेकिं
चनारेमहामर्कंमघवंचित्रमर्च्च॥१॥ मंत्रपुष्पं। मंत्रहीनं॥१॥ वक्रतुं
डमहाकायसूर्यकोटिसमप्रभ॥ अविघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा२
इतिप्रार्थ्यस्वस्तिवाचनंकृत्वा आचार्यादिवरणंकुर्यात्॥ अमुकप्रवरा

रु॰ ३

न्वित अमुकगोत्रोत्पन्नममुकवेदांतर्गतामुकशाखाध्यायिनं अमुकनामानम्॥ अमुकप्रवरान्वितामुकगोत्रोत्पन्नोहं अमुकशर्मा अस्मिन्महारुद्रकर्मणि आचार्यकर्म्मकर्तुंत्वामहं वृणे॥ वृतोस्मीति ब्रूयात्॥ आचार्यस्तु यथास्वर्गे शक्रादीनां बृहस्पतिः॥ तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत॥ इति प्रार्थ्य मधुपर्कादीनां तं पूजयेत्॥ विष्टरो विष्टरो विष्टरः प्रतिगृह्यतां। प्रतिगृह्णामीति॥ अहंवर्ष्मेत्यस्य मंत्रस्य वामदेव ऋषिः विष्टरो देवता। अनुष्टुप्छंदः विष्टरोपवेशने विनियोगः॥ अहंवर्ष्म सजातानां विद्युतामिव सूर्य्यः। इदं तमधितिष्ठामि यो मा कश्चाभिदासति॥१॥ इति मंत्रेण उदगग्रे विष्टरे प्राङ्मुख उपविशेत्॥ पाद्यं पाद्यं पाद्यं

प॰ द्रु ३

प्रतिगृह्यतां प्रतिगृह्णामीति। तत्र मंत्रः॥ अस्मिन् राष्ट्रे श्रियमावेशयाम्यतो देवीः प्रतिपश्याम्यापः॥ दक्षिणं पादमवनेनिजेस्मिन्राष्ट्रे इंद्रियं दधामि॥ सव्यं पादमवनेनिजेस्मिन्राष्ट्रे इंद्रियं वर्द्धयामि। पूर्वमन्यमपरमन्यं पादाववनेनिजे॥ देवराष्ट्रस्य गुप्त्या अभयस्यावरुद्ध्यै। आपः पादावनेजनी द्विषंतं निर्दहंतु मे॥१॥ अर्घ्यमर्घ्यमर्घ्यं॥ प्रतिगृह्यतां प्रतिगृह्णामि। आचमनीयमाचमनीयमाचमनीयं॥ प्रतिगृह्यतां प्रतिगृह्णामि॥ अमृतोपस्तरणमसीत्युच्चार्य्य पिबेत्॥ ततोन्योदकेन शुद्धाचमनं कुर्यात्॥ ततो मित्रस्य त्वा चक्षुषा प्रतीक्षे इति मंत्रेण मधुपर्कं आनीयमानं ईक्षेत्॥ मधुपर्को मधुपर्को मधुपर्कः॥ प्रतिगृह्यतां देव ■ स्य त्वा

नी॰ ५

रु.
४

मी

सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णात्युक्त्वा अंजलि
नानंप्रतिगृह्य॥ मधुवाताइतित्र्यृचस्यराहूगणोगोतमऋषिः॥ विश्वे
देवादेवतागायत्रीछंदः॥ मधुपर्कावेक्षणविनियोगः॥ ॐ मधुवाताऋ
तायतेमधुक्षरंतिसिंधवः॥ माध्वीर्नःसंत्वोषधीः॥१॥ मधुनक्तमुतोष
सोमधुमत्पार्थिवंरजः॥ मधुद्यौरस्तुनःपिता॥२॥ मधुमान्नोवनस्पतिर्म
धुमाँ अस्तुसूर्यः॥ माध्वीर्गावोभवंतुनः॥३॥ ततःसव्यपाणौकृत्वा
अंगुष्ठोपकनिष्ठिकाभ्यांत्रिःप्रदक्षिणमालोड्य वसवस्त्वागायत्रेण
छंदसाभक्षयंतु॥ इतिमंत्रेणपात्रचक्रेपूर्वस्यांनिमार्ष्टि एवंरुद्रास्त्वा
त्रैष्टुभेनछंदसाभक्षयंतु॥ इतिदक्षिणस्यां॥ आदित्यास्त्वाजागतेनछंद

प.
५

साभक्षयंतुइतिपश्चिमायां॥ विश्वेत्वादेवा आनुष्टुभेनछंदसाभक्षयं
तुइतिउत्तरस्यां॥ भूतेभ्यस्त्वेतिमंत्रेण अंतरिक्षेत्रिरुत्क्षिपेत्॥ ततोभूमौ
पात्रंनिधायमधुपर्कैकदेशंगृहीत्वा॥ विराजोदोहोसीतिप्राश्याच
म्य। पुनर्गृहीत्वाविराजोदोहमशीयेति। प्राश्याचम्य। पुनर्गृहीत्वा॥
मयिदोहःपद्यायैविराजइतिप्राश्याचम्यउदञ्जुस्वोब्राह्मणायप्रय
च्छेद्वाप्सुनिक्षिपेत्॥ आचमनीयोदकंगृहीत्वा अमृतापिधानमसी
तिमंत्रेणपर्जान्योदकेनाचमेत्॥ पुनरस्तदेवाचमनीयोदकंगृहीत्वा
।सत्यंयशः श्रीर्मयिश्रीःश्रयतां। इतिमंत्रेण। प्राश्यान्योदकेनद्विरा
चामेत्॥ ततोयजमानःगौर्गौर्गौःप्रतिगृह्यतांप्रतिगृह्णामीतिनिवेद्य

रु. ५ प.

मातारुद्राणामित्यस्यमंत्रस्य। भार्गवोजमदग्निऋषिः गौर्देवतात्रि
ष्टुपूछंदः गोरुत्सर्जने विनियोगः॥ मातारुद्राणांदुहितावसूनांस्वसा
दित्यानाममृतस्यनाभिः॥ प्रनुवोचंचिकितुषेजनायमागामनागाम
दितिंवधिष्टनिजयित्वा ॐ उत्सृजतेतिवदेत्॥ अथयजमानः॥ युवं
वस्त्राणिपी। वसावसाथेयुवोरछिद्रामंतवोहसर्गाः॥ अवातिरतम
नृतानिविश्वऋतेनमित्रावरुणासचेथेइतिवस्त्रं ॐ हिरण्यरूपः स
हिरण्यसंदृगपान्नपात्सेदुहिरण्यवर्णः। हिरण्ययात्परियोनेर्निषद्या गा ५
हिरण्यदाददत्यन्नमस्मैइति अभिरणम्॥ ॐ यज्ञोपवीतंपरमंपवि
त्रंप्रजापतेर्यत्सहजंपुरस्तात्॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवि

तंबलमस्तुतेजः॥ इतियज्ञोपवितं॥ गंधद्वारामितिगंधं ॐ याः फलि
नीर्याः अफलाः अपुष्पायाश्चपुष्पिणीः॥ बृहस्पतिप्रसूतास्तानोमुंचं स्ता
त्वंहसः॥ इतिमाल्यं॥ इति आचार्यपूजा॥ ततः पूर्ववत्ब्राह्मणंवृत्वा
यथाचतुर्मुखोब्रह्मासर्ववेदविशारदः॥ तथात्वंममयज्ञेस्मिन्ब्रह्माभ
वद्विजोत्तम॥ इतिप्रार्थ्यपूर्ववत्पूजयेत्॥ ततः सदस्य॥ ऋत्विजः पूर्वव
द्वृत्वा॥ अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थितामया॥ सुप्रसन्नाः प्रकुर्वं
तुशांतिकंविधिपूर्वकं इतिप्रार्थ्य॥ नानानामगोत्रान्नामामशर्मणोब्रा
ह्मणाऋत्विजोवृणे॥ पूर्ववत्पूजयेत्॥ अथमंडपमाह॥ ततः प्रथ
मंतावत्समभुविपूर्वादौद्वादशांगुलः शंकुस्थाप्यः तस्यशंकोर्या

रु·
६

प·

छायातस्याः यत्प्रमाणं तस्मात्पादन्यूनशंकुनावृतं कार्यं। तस्मिन्वृत्ते
शंकुछायाग्रं वृत्ते यत्र विशति यत्र चापैति उभयत्र चिन्हं कार्यं। अपरेद्यु
रपि तथैव पुनश्चिन्हद्वयं कार्यं॥ पूर्वदिनकृतचिन्ह अपरदिनकृतचिन्ह
योरंतरे भागाः कल्प्याः यदा छायाग्रं विशति यदा चापैति तदंतरालघ
टिका छायादिनात्सातव्या। अत्रैव रात्रिकं॥ यदि षष्ठि ६० घटिभिरेते
अंतरालभागाः लभ्यंते तर्हि छायाप्रवेश छायापरामांतरालघटीभिः
किं आगता ये भागास्तैः पूर्वदिनकृतं प्राचीसूत्रं पूर्वे भाग एव सूर्ये स्यात
रस्मिन्नयने उत्तरतो दक्षिणस्मिन् दक्षिणतश्चाल्यं सम्यक्स्फुटतरा प्राची
भवेत्॥ प्राचीसूत्रं प्रागुक्तं तदंतद्वयमारभ्य तन्मध्ये किंचिदुल्लंघ्य स्थि

६

ड

तेन व्यासार्द्धेन मध्याभिमुखं मिलद्वृत्तार्द्धद्वयं कुर्यात्॥ तत्र यो दक्षिणो
द्गतौ मत्स्यो तन्मध्यांके दक्षिणोत्तरं सूत्रं पातयेत्॥ कुंडमंपादे व्यासो
यावानिष्टस्तावद्द्विगुणां रज्जुमुभयतः पाशौकृत्वा॥ तामेकतः पाशाद्व्या
सार्द्धमात्रे चिन्हयेत् शंकुर्थ ततः शंकुकाद्यतोयतू व्यासार्द्धं तस्या
प्यर्धमाने चिन्हयेत्कर्षणाय ततः कुंडमंडपादौ प्राचीसूत्रप्रमाणेन द
त्वा तदंतयोः शंकु निखन्य तयो रज्जुपाशौ तथा कुर्यात्। यथा व्या
सार्द्धचिन्हकोयतः कृतः सपाशः प्रतीच्यां स्यात्। ततः कर्षचिन्हं दक्षि
णत आकृष्य व्यासार्द्धचिन्हे दक्षिणश्रोणि शंकुं दद्यात्। व्यत्यस्यैवमु
त्तरत उदक्श्रोणि शंकुं दद्यात्॥ पाशौ व्यत्यस्यैवमंसौ साध्यौ॥ इति च

रु.
७

तुरस्रोमंडपः समस्थितेवाथपदोच्छितेवापुरुषेयः पंचमांशाः सहस्तः।
तस्यचतुर्विंशांगुलमितिदशहस्तद्वादशहस्तौमंडपौ अधमौ॥ द्वादश
हस्तचतुर्दशहस्तौमध्यमौ॥ षोडशहस्ताष्टादशहस्तावुत्तमौ॥ तुलापुरु
षादौतुमध्येवेदिः समचतुरस्रातस्याश्चोच्छ्रायस्तुवेद्यायामस्यतृतीयां
शेनचतुर्थांशेनपंचमांशेनसप्तमांशेननवमांशेनैकादशांशेनेतिषड्वि
कल्पाः। अथवाङ्गुष्ठेच्छ्रायः प्रकृतेमहारुद्रादौमध्येवेदेरनुपयोगान्न
कार्या। द्विहस्तकुंडव्यासस्यमानंचतुस्त्रिंशदंगुलानिचतुर्विंशतिरंगुला
न्येकस्तस्यमानं॥ एकचत्वारिंशदंगुलानिपंचयवास्त्रिहस्तस्य। अष्टाच
त्वारिंशदंगुलानिचतुर्हस्तस्य। त्रिपंचाशदंगुलानिषड्यवाः पंचहस्तस्य

प.
७

अष्टपंचाशदंगुलानिसप्तयवाः षट्हस्तस्य। त्रिषष्टिरंगुलानिचत्वारोयवाः
सप्तहस्तस्य। सप्तषष्टिरंगुलानिसप्तयवाश्चाष्टहस्तस्य। द्वासप्ततिरंगुलानि
नवहस्तस्य। पंचसप्ततिरंगुलानिसप्तयवाश्चदशहस्तस्य। पंचाशत्तन्मा
त्रहोमेमुष्टिमात्रंकुंडं। शतहोमेत्वरत्निः। सहस्रहोमेहस्तमितं॥ अयु
तेद्विहस्तं। लक्षेचतुर्हस्तं। दशलक्षेषट्हस्तं। कोटावष्टहस्तं। प्र॰ कोष्ट
स्तुबद्धमुष्टिकोमुष्टिरत्निश्चोच्यते। सचस्याष्टमांशोनोनोहस्तएकविंश
त्यंगुलः सार्द्धैररत्निस्यात्। कुंडखातंतुआद्यमेखलयासहव्याससतुल्यं
ज्ञेयं। कुंडेव्यासचतुर्विंशांशेनकंठः। तस्माद्बहिराद्यामेखलांकार्या।
चतुरस्रक्षेत्रव्यासंचतुर्विंशतिभागान्कृत्वाकंठाद्बहिः समंततश्चतु गा

भोगविस्तारान्नवमांशकोच्चाप्रथममेखलाचतुःकोणाकार्या।अस्यार्थः।
सार्द्धपंचांगुलविस्तारा।द्वादशांगुलानिषड्यवोच्चाप्रथममेखलाकार्या॥
तद्धर्हिद्वितीया अंशत्रयविस्ताराषडंशकोच्चाकार्या।अस्यार्थः॥चत्वार्यंगु
लानियवद्वयविस्तारा॥अष्टांगुलानिचतुर्यवोच्चाद्वितीयामेखला।तद्ध
र्हिस्तृतीया अंशद्वयविस्तारा॥अंशत्रयोच्चा।अस्यार्थः॥अंगुलद्वयंस
प्तयवविस्तारा।चत्वार्यंगुलानि।यवद्वयोच्चात्तृतीयामेखलाकार्या॥पंच
मेखलापक्षे॥तत्राद्यामेखला अष्टांगुलानिचतुर्यवविस्तारा दशांगुला
निषड्यवोच्चा।द्वितीयासप्तांगुलानिएकयवविस्तारा।दशांगुलानिय
वद्वयोच्च॥तृतीयापंचांगुलानिपंचयवविस्तारा॥सप्तांगुलानिषड्य

वोच्चा।चतुर्थीचत्वार्यंगुलानियवद्वयविस्तारा।पंचांगुलानियवद्वयोच्चा
पंचमीद्व्यंगुलषड्यवविस्ताराद्व्यंगुलषड्यवोच्चाकार्येतिपंचमेखला
पक्षः।अथवापंचादिविस्तृतिसंमितोच्चाःकार्याः।विस्तारतुल्योच्चतावा
दिनांमतेतुताःषट्पंचचतुस्त्रिद्व्यंशमितोच्चताएवकार्याः।योनिस्तुकुं
डव्यासार्द्धमानेनदीर्घा।कुंडव्यासतृतीयांशविस्तृता।कुंडव्यासचतु
र्विंशांशेनोच्चा।कुंडखातेमध्यभागेनाभिर्निवेश्यासाचसर्वकुंडेषुपद्मा
कारात्तत्तत्कुंडाकारसवास्यात्॥तस्याउच्चत्वंकुंडव्यासद्वादशांशेनवि
स्तारायामौव्यासषष्ठांशेन॥ ॥इतिनाभिः॥ ॥मंडपमाह॥ ॥दिशांम
ध्येद्विहस्तविस्तृतानिचत्वारिद्वाराणिदिक्सूत्रमभितोहस्तहस्तमानकुं

रु.
८

तद्द्वारशाखानिकार्याणि॥ इति द्विविधे प्रथममंडपे। मध्यमंडपे द्विविधे चतुरं
गुलाधिकद्विकरायामानि श्रेष्ठमंडपे द्विविधे अष्टांगुलाधिककरायामानि
सारद्रुमाः शालशिंशपमधूकजंबादीनां सजवसप्रमेणाः षोडशस्तंभाः।
तेषु स्तंभेषु मध्यकोणस्था द्वारस्थाश्च द्वादशस्तंभाः पंचहस्तोच्छ्रायाः का
र्याः। वेदिकोणंश्चत्वारः सचूडाशिखाभाजः अष्टहस्ता नवहस्ता वा भवं
ति। सर्वेपि स्तंभाः स्वस्वपंचमांशेन निखेयाः तत्र वेदिकोणगस्तंभेषु उ
परि चूडाप्रोत्तरं ध्राणि उभयतोरंध्रद्वयं वंति च त्वारि तिर्यक्काष्ठानि बलि
कारव्यानि निधेयानि। द्वादशस्तंभानां मध्ये चत्वारस्तंभा मंडपकोणेषु नि
खेयाः अन्येष्टौ एवैकं द्वारमुभयतो द्वौ द्वौ एवं वेदिकोणस्तंभ। पंक्तिस

प.
९

मतया निखेयाः। एषु बाह्यस्तंभेषु चूडास्थूर्वा न वा। तिर्यक्काष्ठनिवेशनं
तु स्तंभकर्णादिना कार्यं। वेदिकोणस्तंभेषु तु चूडा नियम एव। अथ तोर
णान्याह॥ अश्वत्थशाखे पूर्वद्वारे॥ उदुंबरशाखे दक्षिणद्वारे॥ प्लक्षशा
खे पश्चात्॥ वटशाखे उदक्॥ शाखाश्चास्य ममध्यमोत्तममंडपेषु क्रमात्
पंचषट्सप्तहस्तोच्छ्रा भवंति॥ तासामुपरि कल्पितचूडासु तिर्यक्फल
कमुभयतः सबिलं चूडान्यस्ताबिलं न्यसेत्॥ तत्तिर्यक्फलकं द्विहस्तं
यमुत्तमे॥ तिर्यक्फलकौ मध्यममंडपे॥ अंगुलषड्वाधिकद्विहस्तं मध्य
मे॥ द्वादशांगुलाधिकहस्तद्वयमुत्तमे॥ तिर्यक्फलकोपरि मध्ये मंडपत्र
माच्चतुरंगुलाः सार्द्धचतुरंगुलाः पंचांगुलाश्च कीला निवेश्याः॥ ३॥

रु.
१०

तिर्यक्फलाकं कीलाश्चतत्काष्टस्यैवएतावतोरणस्वरूपं॥ वैष्णवयागे तोरणोपरि कीलाः क्रमात्शंखचक्रगदाब्जाभाः कार्याः यद्वास्तम्भास्त्रे मस्तके द्वादशांशेन शंखचक्रगदांबुजं प्रागादिक्रमयोगेन न्यसेत्तेषां स्वदारुजमिति॥ अत्र द्वादशांशाः फलकस्य चतुरंगुलादिरेवोक्तः॥ शै वे यागे तेकीलाः शूलाकाराः स्युः शूलाकारत्वं चैवं॥ नवांगुलोच्चस्तंम ध्यकीलः सरलस्तमुभयतोन्यौ किंचिद्वक्रौ सपादद्व्यंगुलो विस्तारः शू लस्य। चतुर्थांशेन दैर्घ्यं। मध्ये ऽर्धांगुलद्वयं बिलप्रवेशाः इत्यधममंडपे॥ मध्यमे तु एकादशांगुल उच्छ्रायः पादोनत्र्यंगुलविस्तारस्त्र्यंगुलबि लप्रवेशाः। उत्तममंडपे त्रयोदशांगुल उच्छ्रायः॥ सपादत्र्यंगुलो विस्ता

प.

१०

रश्चतुरंगुलो बिलप्रवेशाः॥ इति संक्षेपेण कुंडमंडपविधिः॥ ॥ तत्र लघुरुद्रे अष्टाचत्वारिंशत्सपक्षे दशांशेन होमसंख्या॥ ॥५८२॥ अतोत्रारत्निमात्रं कुंडं॥ अत्रैव प्रतिमंत्रविभागे दशांशेन होमसंख्या॥ २०५१॥ अतो हस्तमात्रं। अत्रैव मूलमंत्रहोमपक्षे॥ ३१२॥ आर त्निः महारुद्रे अष्टाचत्वारिंशत्पक्षे दशांशेन होमसंख्या॥ ६५१६॥ अतोत्रापि हस्तमात्रं। तत्रैव प्रतिमंत्रविभागे दशांशेन होमसंख्या ॥४३९७३॥ अतोत्र द्विहस्तं चतुर्हस्तं वा कुंडं कुर्यात्॥ अत्रैव मूल मंत्रपक्षे दशांशेन होमसंख्या॥ अतोत्रापि द्विहस्तं कुंडं॥ तत्र महार्णवो क्तहोमपंचप्रकारानाह॥ एकोनसप्तत्युत्तरशतं मंत्रविभागेनाष्टाचत्वा

२४९९७१

रु॰
११

शन्मंत्रविभागेन तथाषोडशधामंत्रविभागेन तद्दनंतरं षोढामंत्रविभागेन वाकर्त्तव्यं तेषु एतेषु पंचप्रकारेषु तन्मध्ये एकोनसप्ततरशत मंत्रविभागः कथ्यते ॥ प्रथमानुवाकस्य पंचदशमंत्राः १५ द्वितीयानुवाके १३ तृतीयानुवाके १७ चतुर्थानुवाके १५ पंचमानुवाके १५ षष्ठानुवाके १५ सप्तमानुवाके १६ अष्टमानुवाके १७ नवमानुवाके १७ दशमानुवाके १२ एकादशानुवाके १० नमो रुद्रेभ्य इति त्रीणि यजूंषि ३ इति मंत्रविभागः अथ अष्टाचत्वारिंशन्मंत्रविभागः तत्र प्रथमानुवाके १५ अष्टानुवाकानां नमो हिरण्यबाहवे इत्यादि अष्टौ मंत्राः द्रापे इति द्वादश १२ सहस्राणीति १० नमो रुद्रेभ्य इति त्रीणि

प॰

११

यजूंषि ३ इत्यष्टाचत्वारिंशत्सक्षः। अथ षोडशधाविभागः नमस्ते रुद्र इत्यारभ्य नमस्तक्षभ्यो रथकारेभ्यः इत्यारभ्य नमः स्वायुधाय
मेत्यंतं द्वितीयः। सुधन्वने इतित्यारभ्य एतावंतश्चेत्यंतं दशमंत्राः नमो रुद्रेभ्य इति त्रीणि यजूंषि इति षोडशधाविभागः॥ अथ षोढाविभागः नमस्ते रुद्र मन्यव इत्यारभ्य सभापतिभ्यश्चेत्येको मंत्रः॥ ॐ नमो अश्वेभ्य इत्यारभ्य नमः पार्याय चेत्यंतो द्वितीयः नमः प्रतरणाय चेत्यारभ्य एतावंत उत्तरश्च सहितं एको मंत्रः नमो रुद्रेभ्य इति त्रीणि यजूंषि ३ इति षोढाविभागः अथ त्रेधाविभागः नमस्ते रुद्र मन्यव इत्यारभ्य सभापतिभ्य इत्येको मंत्रः नमो अश्वेभ्य इत्यारभ्य नमः पार्याय चे

ति

रु.
१२

संतोद्वितीयः नमः प्रतरणायेत्यारभ्य आसमाप्तेस्तृतीयः इतित्रेधा
पक्षः एषां पक्षाणां मध्ये यथाशक्त्या एकं पक्षं अंगीकृत्य मृगीमुद्रया
होमः कर्तव्यः ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः सपत्नीकः सा
चार्यऋत्विक्कोयजमानो मंगलघोषेण पूर्णकलशहस्तः॥ ॐ भद्रं क
र्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः॥ स्थिरैरंगैस्तुष्टुवां
सस्तनूभिर्व्यशेम देवहितं यदायुः॥ शतमिन्नुशरदो अंतिदेवा यत्रा
नश्चक्रा जरसं तनूनां॥ पुत्रासो यत्र पितरो भवंति मानो मध्यारीरिषता
युर्गंतोः अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता सपिता सपुत्रः॥ वि
श्वेदेवाः अदितिः पंचजना अदितिर्जातमदितिर्जनित्वं॥ इतिमंत्रे

प.

१२

मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविशेत्॥ ततः मंडपांतः पश्चि
मदेशे उपविश्याचम्य प्राणानायम्य देशकालौ स्मृत्वा एवं विधे काले
देशे च मया ब्राह्मणद्वारा कृतस्य महारुद्रादिजपस्य तथा अंगत्वेन न
ग्रह मृत्युंजय सप्तशातिका मालामंत्र जपस्य दशांशेन आमुकपक्षेण
मुकद्रव्येण यथाशक्ति ब्राह्मणद्वारा होमम् अहं करिष्ये॥ तदंगत्वया ग
णेशपूजनं मंडपदेवताप्रतिष्ठापनादि च करिष्ये॥ इति संकल्प्य॥ षो
डशोपचारैर्गणाधिपं संपूज्य॥ ततो गौरसर्षपैः सर्वतो मंडपांतर्वि
किरेत्॥ तत्र मंत्रः॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा॥ स्था
नं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥ अपक्रामंतु भूतानि पिशाचाः

सर्वतोदिक्षुं सर्वेषामविरोधेन ब्रह्मकर्मसमारभे ॥ ॥ ततः पंचगव्ये
न कुंभैः सर्वत्र प्रोक्षणं शुची वो हव्येति तृचेनापोहिष्ठेति तृचेन । कार्यं
ॐ ३ शुची वो हव्या मरुतः शुचीनां शुची हिनोम्यध्वरं शुचीभ्यः ॥ ऋते
न सत्यमृतसापः आयञ्छुचिजन्मानः शुचयः पावकाः ॥ अग्निः शु
चिव्रततमः शुचिर्विप्रः शुचिः । कविः । शुचिरोचत आहुतः । उदग्ने शु
चयस्तव शुक्रा भ्राजंत ईरते ॥ तव ज्योतींष्यर्चयः ॥ आपो हि ष्ठा मयो भु
वस्तान ऊर्जे दधातन ॥ महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भा
जयतेह नः । उशतीरिव मातरः ॥ तस्मा अरंगमाम वो यस्य क्षयाय जिन्व
थ । आपो जनयथा च नः ॥ ततः कृतांजलिः स्वस्त्ययनं तार्क्ष्यमिति मंत्र

द्वयं पठेत् ॥ ॐ स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानां ॥
असुरघ्नमिंद्रसखं समत्सु बृहद्यशो नावमिवारुहेम ॥ अंहोमुचमांगिर
सं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यं प्रयतपाणिः शरणं प्रपद्ये स्वस्ति सं
बाधेष्वभयं नो अस्तु ॥ ततो वेद्यां सर्वतो भद्रादि विरच्य । तत्रादौ वास्तुमंड
लं विधाय ॥ तदित्थं ॥ ततो मंडपनैर्ऋत्यां मृदा वेदिं कृत्वा ईशानादिषु ॥ विद्यं
तु भूतले नागा लोकपालाश्च सर्वतः ॥ अस्मिन्मंडपे वलिष्टं तु आयुर्बल
काराः ॥ सदेति चतुरः शंकून्रोपयित्वा । तत आग्नेयादिक्षुं कुपार्श्वे
भक्तबलिं दद्यात् ॥ अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः ॥
तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तममिति । एवं मंत्रत्रयेणैतेः

सवायव्येत्राग्न्यांमंत्रेणत्वांकुपार्श्वेभक्तबलिंदत्वा।तेचमंत्राः।नैऋत्याधि
पतिश्चैवनैऋत्यांयेचराक्षसाःबलिंतेभ्यप्रयच्छामिसर्वेगृह्णंतुमंत्रितं॥
ॐनमोवायुरक्षेभ्योयेचान्येतत्समाश्रिताः॥बलिंतेभ्यःप्रयच्छामि॥
रुद्रेभ्यश्चैवसर्पेभ्योयेचान्येतत्समाश्रिताः॥बलिंतेभ्यःप्रयच्छामिम
ह्यंतुसततोत्सुकाः॥वस्त्रेस्ववर्णादिशलाकया॥शांता।यज्ञोवती।
कांता।विशाला।प्राणवाहिनी।सती॥वसुमती॥नंदा।सुभद्रेति।प्राग
यतानवरेखाःकृत्वाहिरण्या।सुव्रता।लक्ष्मीः।विभूतिः।विमला।प्रि
या।जया।काला।विशोकाचेतिनवदक्षिणोत्तरायताःकृत्वा।मध्य
कोष्ठचतुष्टयमेकीकृत्य।कोणेषुरेखांदत्वा।देवताआवाहयेत्॥म

ध्यपदचतुष्केहृदयेब्रह्माणआवाहयामि॥एवमग्रेपि।पूर्वपदद्वयेदक्षि
णहस्तेअर्यमणंआवा०॥दक्षिणपदद्वयेजठरदक्षिणेविवस्वंतंआवा०
पश्चिमपदद्वयेजठरवामेमित्रंआवा०॥उदक्पदद्वयेवामस्तनेपृथ्वी
धरंआवा०॥आग्नेय्यपदार्द्धयोर्दक्षिणहस्तेसावित्रसवितारौआवा०
नैऋत्यपदार्द्धयोर्दक्षिणमेढ्रयोर्विबुधाधिपजयौआवा०॥वायव्यपदा
र्द्धयोर्वामहस्तेराजयक्ष्मरुद्रौआवाहयामि॥ईशानपदार्द्धयोर्मुखे
आपापवत्सौआवाह०॥ईशानपददक्षिणार्द्धेशिरसिशिखिनंआ
वाह०॥तद्दक्षिणसार्द्धपदेदक्षिणनेत्रेपर्जन्यंआवाह०॥तद्दक्षिणप
दद्वयेदक्षिणश्रोत्रेजयंतंआवाहयामि॥तद्दक्षिणपदद्वयेदक्षिणां

सेकुलिशायुधं आवाह॰॥ तद्दक्षिणपदद्वये दक्षिणबाहौ सूर्यं आवा॰
तद्दक्षिणपदद्वये दक्षिणबाहवे सत्यं आवा॰॥ तद्दक्षिणसार्द्धपदे दक्षि
णकूर्परे भृशं आवा॰॥ तद्दक्षिणाग्नेयपदार्द्धे दक्षिणबाहावाकाशं आ
वा॰॥ तत्पश्चिमाग्नेय्यपदार्द्धे दक्षिणबाहे वायुं आवा॰॥ तत्पश्चिम
सार्द्धपदे दक्षिणमणिबंधे पूषणं आवाहयामि॥ तत्पश्चिमपदद्वये
दक्षिणपार्श्वे वितथं आवाह॰॥ तत्पश्चिमपदद्वये दक्षिणपार्श्वएव
गृहक्षतं आवा॰॥ तत्पश्चिमपदद्वये दक्षिणोरौ यमं आवा॰॥ तत्प
श्चिमपदद्वये दक्षिणजानौ गंधर्वं आवाहयामि॥ तत्पश्चिमसार्द्धप
दे दक्षिणजंघायां भृंगराजं आवा॰॥ तत्पश्चिमनैर्ऋत्यपदार्द्धे दक्षि

णस्फिचि मृगं आवा॰॥ तदुत्तरार्द्धपदयोर्दक्षिणपार्श्वएव पितॄन् आ
वाह॰॥ तदुत्तरसार्द्धपदे वामस्फिचि दौवारिकं आवा॰॥ तदुत्तरपद
द्वये वामजंघायां सुग्रीवं आवाह॰॥ तदुत्तरपदद्वये वामजानौ पुष्पदं
तं आवा॰॥ तदुत्तरपदद्वये वामोरौ वरुणं आवा॰॥ तदुत्तरपदद्वये वा
मपार्श्वे आसुरं आवाह॰॥ तदुत्तरसार्द्धपदे वामपार्श्वएव शोषं आवा॰
तदुत्तरवायव्यपदार्द्धे वाममणिबंधे पापं आवा॰॥ तत्प्राक्पदार्द्धे वा
मप्रबाहौ रोगं आवा॰॥ तत्प्राक्सार्द्धपदे वामप्रबाहौ अहिर्बुध्न्यं आ
वा॰॥ तत्प्राक्पदद्वये वामकूर्परे मुख्यं आवा॰॥ तत्प्राक्पदद्वये वाम
बाहौ भल्लाटं आवा॰॥ तत्प्राक्पदद्वये वामबाहवे वसोमं आवाहयामि॥

रु·
१६

प·

तस्याक्पद्दद्दयेवामांसेसर्पं आवाहयामि॥ तस्याक्सार्द्दपदेवामश्वोत्रेआ
दितिं आवा०॥ तस्यागर्द्दपदेवानेत्रेदितिं आवा०॥ उत्तरेवास्तोष्पतः
तिवास्त०। वास्तोष्पतेवसिष्ठावास्तोष्पतिस्त्रिष्टुप्॥ वास्तोष्पत्यावाहने
विनियोगः॥ ॐवास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशो अनमीवोभ
वासनः॥ यत्त्वेमहेप्रतितन्नोजुषस्वशंन्नोभवद्विपदेशंचतुष्पदे॥ वा
स्तोष्पतिं आवा० ईशान्यादिविदिक्षुचरकीं आवाहयामि॥ विदारीं
आवाहयामि॥ पूतनां आवाह०॥ पापराक्षसीं आवाह०॥ पूर्वादिदि
क्षुस्कंदं आवा०॥ आर्यमणं आवा०॥ जृंभकं आवा०॥ पिलिपिच्छं आ
वा०॥ ततः प्रागादिलोकपालान् आवाह्य॥ तदरू०। गृहावे०। संपूज्य

१६

पायसबलिंदद्यात्॥ अर्यनतस्वरकेभ्यएषमाषभक्तबलिंसमर्पया
मि॥ एवंविदार्यै। पूतनायै। पापराक्षस्यै। स्कंदाय। अर्यम्णे। जृंभका
य। पिलिपिच्छाय। ततःपावमानिभिरक्षोहणमितिसूक्तेनचत्रिःसू
त्रीवेष्टनंकुर्यात्॥ ततःपूर्वस्यांदिशिमंडपद्वाराद्बहिर्हस्तमात्रेअ
श्वत्थतोरणंसुदृढंनामकंतोरणंसुशोभननामकंवात्रांरवचिन्हितं॥
अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं। होतारंरत्नधातमं॥ सु
दृढतोरणायनमः॥ सुदृढतोरणं आवाहयामि॥ सुदृढतोरणाय
नमःगंधंसमर्पयामि। पुष्पंसमर्पयामि। धूपंचदीपं०नैवेद्यं०तांबू

हस्तमात्रकुंडः प्रमाणं ।। द्विहस्तनिमन ३३

स्यात अंगुलि	१५	स्यात	२२
प्रथममेखला	४	कंठ	१।।
द्वितियमेखला	३	प्रथममेखला	५
त्रितियमेखला	२	द्वितियमेखला	४
कंटयक अंगुल	१	त्रितियमेखला	२
योनिलंबः	१२	योनिलंबः	१२
योनिविस्तारः	८	योनिविस्तारः	११
नाभि अंगुले	२	नाभिः	२

।। श्री ।।

।। अद्येत्यादि शुभपुण्यतिथौ मम आ ।।
।। त्मनः श्रुति० अमुकगोत्रोत्पन्न अ ।।
।। मुकशर्मणो सकुटुंबस्य मम श्री ।।
।। दुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्व ।।
।। क निरतिशयैहिकामुष्मिक ।।
।। सुखप्राप्तिसकलपापनिवृत्तिदि ।।
।। व्ये दिमो नोरूढे संस्ले पितृगेणसेहि ।।
।। तगीतनृत्य विलासि अप्सरोगण ।।
।। वीज्यमान सकल भोगायुतकल्प ।।
।। कोटीशतकिल्पोकनिवासइहजन्म ।।
।। नीनजन्मांतरे पुत्रपौत्रादि संकल ।।
।। संपत्सहितमहैश्वर्यादिगुणयुक ।।

चतुहस्ताचेमान ४८
स्नात अंगुले ३०
प्रथममेखला अं० ८
द्वितियमेखला अं ६
त्रितियमेखला अं ४
योनिलंब: २४
योनिविस्तार: १६
कंठ अंगुले २
नाभि अंगुले ४

समर्हम:

॥ अद्येत्यादि मया क्रियमाणेह्यानचंडिद ॥
॥ हेमांत्ते होमे देवतापरिगृहार्थमन्वाधानंक ॥
॥ रिष्ये ॥ चक्षुष्यंते । अत्रप्रधानं । अदित्या ॥
॥ दिलोकपालदेवताश्चयथोक्तसंख्याका ॥
॥ भिः । अर्कादियथा लाभसमिचरुघृताक्त ॥
॥ तिलाज्याहुतिभिः । पुनरत्रप्रधानं । महाका ॥
॥ लि । महाल० महासर० । कवचार्गला कील ॥
॥ करहस्यांतर्गतप्रथममध्यमोत्तचरित्रां ॥
तर्गततत्तन्मंत्रैः समस्तं ॥
स्वाहुतिभिः । तिलसर्पिर्मि ॥
श्र पायसादिद्रव्यैः । अधा ॥
रऊं त्यादिपीठदेवतावर्णे ॥
देवताब्रह्मादिमंडलदेव ॥
ताश्चएकैकयाज्याहुत्या ॥
शेषेण । स्विष्टकृतमित्यादि०

५

॥ राज राजवंशानुपरा जिष्णु चतु ॥
॥ विधपुरुषार्थयूताधि पुरारोग्यसदभि ॥
॥ ष्ट सिध्यर्थं श्री महाकाली महाल ॥
॥ क्ष्मी महासरस्वती देवताप्रीत्यर्थं ॥
॥ ब्राह्मण द्वारा शातचंडि पाठं श्च करि ॥
॥ ष्ये ॥ तदंगस्वस्तिपुण्याहवाचनं ॥
॥ ऋत्विग्वर्णनं करिष्ये ॥ अमुकगो ॥
॥ त्र अमुकप्रवरान्वित अमुकशर्मा ॥
॥ र्मोहं । अमुकगोत्र अमुकप्रवरा ॥
॥ न्वित अमुकशर्माध्यापिनं अमुकश ॥
॥ र्माणं अस्मिन् शातचंडी संख्यापूर्ति ॥
॥ ये सप्तशति पाठार्थं त्वामहं वृणे ॥
॥ वृतो स्मि इत्युक्त्वा । तान्यथासंभ ॥
॥ वं पूजयेत् ॥ ८ ॥ अर्थ्वेस्या ८ ॥ श्री ॥
॥ चतुर्थे न्रिप । त्न्यापत्यसहित यजमानं ॥
॥ तैलेन तैलेनाभ्यंगं कृत्वा । नित्यकर्मानि ॥

॥ चम्य। आचम्यादेशकालौसंकीर्त्यममआ॥
॥ त्मनः॰। अमुकगोत्रोत्पन्न अमुकश ॥
॥ र्मणोसपत्निकस्यममम नोवाक्कायक॥
॥ र्मभिः कृताना अपनोदार्थं मनोभिलषितका॥
॥ मनासिध्यर्थं श्रीमहाका॰। महालु॰म॥
॥ हास॰। देवताप्रीत्यर्थं ब्राह्मणद्वाराक॥
॥ तत्रादौ चंडिसांगतासिध्यर्थं तद्दशांश॥
॥ सग्रहमखसप्तशतिमालामंत्रहवनं॥
॥ करिष्ये॥ तदंगंस्वस्तिपुण्याहवाचनं॥
॥ मातृकापूजनंनांदिश्राद्धं विधानोक्त॥
॥ आचार्यादि ऋत्विग्वरणंकरिष्ये॥ ॥
॥ प्रयोगमार्गेण वृद्धिश्राद्धांतंकृत्वा। ऋ॥
॥ त्विजोवृत्वा। वृत्तान् ऋत्विग्भ्योमधु॥
॥ पर्केणार्हैइष्ये॥ आचार्यस्तुयथासं॰इ॥
॥ त्यादिचतुःश्लोकैस्ऋत्विजैःसंप्रार्थ्य॥॥
॥ आचार्यःसर्षपविकिरणादिविधानमार्गे॥
॥ णाग्निस्थापनांतंकृत्वा। अन्वादध्यात्। ॥

ले॰। दक्षिणांतोपचारैः पूजयेत्॥ तत्रराहुं आवा॰॥ बृहस्पतिं आवा॰
राहुबृहस्पतिभ्यांनमः। गंधाद्युपचारान्समर्पयामि। तत्रैकः कलशस्था
प्यः॥ तत्रमंत्राः॥ ॐ महिद्यौः पृथिवीचनइमंयज्ञंमिमिक्षतां॥ पिपृतांनो
भरीमभिः रितिभूमिंस्पृष्ट्वा॥ ओषधयः संवदंतेसोमेनसहराज्ञा॥ य
स्मैकृणोतिब्राह्मणस्तंराजन्पारयामसी। तियवान्क्षिप्त्वा॥ आकलशे
षुधावतिपवित्रेपरिषिच्यते॥ उक्थैर्यज्ञेषुवर्द्धतइतिकलशंस्थाप्य।
इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥ असिक्न्याम
रुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमयेतिजलमापूर्य्य। गंधद्वारां

दुराधर्षांनित्यपुष्टांकरीषिणीं॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रिय
मितिगंधंक्षिप्त्वा॥ या ओषधीः पूर्वाजातादेवेभ्यस्त्रियुगंपुरा॥ मनैनु
बभ्रुणामहंशतंधामानिसप्तचेतिसर्वौषधीः क्षिप्त्वा॥ कांडात्कांडा
त्प्ररोहंतीपरुषः परुषः परि॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनचेति
दूर्वाः॥ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता॥ गोभाजइत्किलास
थयत्सनवथपूरुषमितिपंचपल्लवान्॥ स्योनापृथिविभवान्नृक्षरा
निवेशनी॥ यच्छानः शर्म्मसप्रथइतिपंचमृदः॥ याः फलिनीर्याअफ
लाअपुष्पायाश्चपुष्पिणीः बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसइति

फलंक्षिपेत्॥ सहिरत्नानिदाशुषेसुवातिसविताभगः। तंभागंचि
त्रमीमहेरत्नानिनिक्षिपेत्॥ हिरण्यरूपः सहिरण्यसंदृगपांनपात्से
दुहिरण्यवर्णः॥ हिरण्ययात्परियोनेर्निषद्या हिरण्यदाददत्यन्नमस्मै
इतिहिरण्यं॥ युवासुवासाः परिवीत आगात्सउश्रेयान्भवतिजाय
मानः॥ तंधीरासः कवयउन्नयंतिस्वाध्यो३ मनसादेवयंतः। इतिव
स्त्रं॥ पूर्णादर्विपरापतसुपूर्णापुनरापत॥ वस्नेवविक्रीणावहाइ
षमूर्जंशतक्रतो। इतिउपरिधान्यपूर्णपात्रंन्यसेत्॥ तस्मिन्कल
शेध्रुवायनमः ध्रुवं आवाहयामि॰ ध्रुवायनमः॥ गंधाद्युपचारा

न्त्समर्पयामि॥ ततोदक्षिणे। औदुंबरंसुभद्रंविकटंचाचक्रचिन्हितंतो
रणं॥ इषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवः सविताप्रार्पयतुश्रे
ष्ठतमायकर्मणे इतिमंत्रेणसुभद्रतोरणंआवा॰। सुभद्रतोरणायनमः
गंधाद्युपचारान्त्समर्पयामि। सूर्यंआवाहयामि। अंगारकंआवाहया
मि। सूर्याअंगारकाभ्यांनमः गंधाद्युपचारान्त्समर्पयामि॥ पूर्वव
देवकलशस्थापनं॥ तत्रधरायैनमः धरांआवाहयामि॥ धरायैनमः
गंधाद्युपचारान्त्समर्पयामि ततः पश्चिमेद्वाःशेसुभीमंसुकर्मना
मकंचागदाचिन्हितंतोरणं॥ अग्नआयाहिवीतयेगृणानोहव्य

हातये। नि होता सत्सि बर्हिषि। सुकर्मतोरणाय नमः। सुकर्मतोरणं
आवाह॰। सुकर्मतोरणाय नमः गंधाद्युपचारान्समर्पयामि। शुक्रं आ
वाह॰। बुधं आवा॰। शुक्रबुधाभ्यां नमः गंधाद्युपचारान्समर्पयामि
तत्र कलशस्थापनं। वाक्पतये नमः वाक्पतिं आवाहयामि। वाक्प
तये नमः गंधाद्युपचारान्समर्पयामि। ततउत्तरे। वाटं सुप्रभं सुहोत्र
नामकं चापध्वचिन्हितं तोरणं। शन्नो देवीरभिष्टय आपो भवंतु पी
तये। शंयोरभिस्रवंतु नः। सुहोत्रतोरणं आवा॰ सुहोत्रतोरणाय न
मः। गंधाद्युपचारान्समर्पयामि। सोम आवाहयामि। केतुं आवा॰ शनै

श्चरं आवा॰। सोमकेतुशनैश्चरेभ्यो नमः गंधाद्युपचारान्समर्प॰॥
तत्र कलशस्थापनं। विघ्नेशाय नमः। वि घ्नेशं आवा॰ विघ्नेशाय नमः
गंधाद्युपचारान्समर्पयामि। ततः पूर्व द्वारे कलशद्वयं महीद्यौरि
त्यादिमंत्रैस्थापयेत्॥ प्रतिकलशं मंत्रावृत्तिः ऐरावतं तत्कलशद्वये
न्यसेत्पूजयेच्च अस्मिन्कलशद्वये ऐरावतमावाहयामि। ऐरावताय
नमः गंधाद्युपचा॰ तत्र ऋग्वेदिनावृत्विजो पूर्वद्वारे शांतिसूक्तं जपा
थेन त्वामहं वृणे॥ ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः। अत्रिगो
त्रस्तु विप्रेंद्र ऋत्विक् मे। मखे भवेति प्रत्येकं दत्वा। ॐ अग्निमीळे पुरो

रु॰
२०

हितमितिमंत्रेणप्रत्येकंगंधादिभिरुपचारैःपूजयेत्॥ततः सहस्राक्षंम
तैरावणास्थितंपीतंकिरीटकुंडलधरंदक्षिणवामकरस्थवज्रोत्पलमिं
द्रंध्यात्वा॥ओंएह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश। संवीज्य
मानोप्सरसांगणेनरक्षाध्वरन्नोभगवन्नमस्ते। भोइंद्र इहागच्छ इहति
ष्ठ इंद्रसांगंसपरिवारंसायुधंसशक्तिकंद्वारकलशे आवाहयामि॥आ
शुः शिशानोवृषभोनभीमोघनाघनः क्षोभणश्चर्षणीनां॥संक्रं
दनोनिमिषएकवीरः शतंसेनाअजय त्साकमिंद्रः॥इतिमंत्रेणपी
तांपताकांपीतध्वजंचद्वयमपिपंचहस्तदंडमुछ्रयेत्॥ततः त्रातार

प॰

२०

हव

मिंद्रमवितारमिंद्रंहवेसुहवंशूरमिंद्रं। ह्वयामिशक्रंपुरुहूतमिंद्रंस्व
स्तिनोमघवाधात्विंद्रः॥इंद्रायनमः गंधाद्युपचारान्समः॥इंद्रः सुरप
तिः श्रेष्टोवज्रहस्तोमहाबलः॥शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोन
मः इतिनत्वा। इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायए
तंमाषभक्तबलिंसमर्पयामितिबलिंदद्यात्॥तत आचम्याग्नेय्यांगत्वा
पूर्ववत्कलशंस्थापयित्वा। पुंडरी प्र कं आवाह॰॥अमृतंआवा॰ पुंड
रीकामृताभ्यांनमः गंधाद्युपचारान्समर्पयामि। छागस्थंरक्तंदक्षिण
वामकरद्वयधृतशक्तिकमंडलुंयज्ञोपवीतिनमग्निंध्यात्वा॥ओंए

रु:
२१

ह्येहिसर्वामरहव्यवाहमुनिप्रवर्यैरभितोभिजुष्ट॥तेजोवताल्लोकगणेनसा
र्द्धंममाध्वरंपाहिकवेनमस्ते॥भोअग्नेइहागच्छइतिष्ठअग्निंसांगंसपरि
वारंसायुधंसशक्तिकंकलशेआवा॰ह॰॥अग्निंदूतंवृणीमहेहोतारंवि
श्ववेदसं।अस्ययज्ञस्यसुक्रतुं।इतिमंत्रेणरक्तांपताकांरक्तध्वजंचउच्छ्र
येत्॥ततस्त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेलोवयासिसीष्ठाः॥य
जिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्॥इतिमंत्रेण
अग्नयेनमःगंधाद्युपचारान्समर्पयामि॥आग्नेयःपुरुषोरक्तःसर्ववेद
मयोव्ययः॥धूमकेतुरजोध्यक्षस्तस्मैनित्यंनमोनमइतिनत्वा।अग्नये

प:
२१

सांगायसपरिवारायसायुधायसशक्तिकायएतंमाषभक्तबलिंसमर्पया
मितिबलिंदद्यात्॥ततआचम्यदक्षिणेगत्वाप्रतिद्वारशाखांपूर्ववन्मंत्रैः
कलशौद्वयंसंस्थाप्य।तत्रकलशद्वयेवामननामकदिग्गजंआवाह॰।वाम
ननामकदिग्गजायनमःगंधाद्युपचारान्समर्पयामि।तत्रयजुर्विदावृत्वि
जौदक्षिणद्वारेशांतिसूक्तंजपार्थेनत्वामहंवृणे॥कातराक्षोयजुर्वेदस्त्रै
ष्टुभोविष्णुदैवतः।काश्यपेयस्कविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिप्रत्येकं
वृत्वा॥इषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठ
तमायकर्म्मणे।इतिमंत्रेणगंधादिभिरभ्यर्च्य॥ततोमहिषारूढंधृतदं

श्रा॰
२२

प॰

दुपाश्रदक्षिणवामकरद्वयं कृष्णाजिनं च योपमं अग्निसमलोचनं यमं ध्या
त्वा॥ ओं एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्त्ते। शुभाशुभानं
दशुचामधीशाशिवाय नः पाहि मखं नमस्ते। भो यम इहागच्छ इह तिष्ठ य
मं सांगं सपरिवारं सायुधं सशक्तिकं द्वारकलशे आवाह॰॥ आयं गौः पृ
श्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः इति मंत्रेण कृष्णांपता
कां कृष्णध्वजं च उच्छ्रयेत्॥ ततो यमाय सोमं सुनुत यमाय जुहुता हविः॥

२२

यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः॥ यमाय नमः गंधाद्युपचारान्समर्प
यामि। महामहिषमारूढं दंडहस्तं महाबलं॥ आवाहयामि यज्ञेस्मिन्पू

जेयं प्रतिगृह्यतां। यमाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं
माषभक्तबलिं समर्पयामि। तत आचम्य नैरृत्यां पूर्ववत्कलशं संस्थाप्य॥
कुमुदं आवा॰। दुर्जयं आवा॰। कुमुददुर्जयाभ्यां नमः गंधाद्युपचारान्स
मर्पयामि॥ ततो नरारूढं महाकायं खड्गहस्तं महाबलं॥ नीलं बहुराक्ष
सवेष्टितं पीतं पीताभरणभूषितं निरृतिं ध्यात्वा॥ ओं एह्येहि रक्षोग
णनायकस्त्वं विशालवेताल पिशाचसंघैः॥ ममाध्वरं पाहि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते॥ भो निरृते इहागच्छ इह तिष्ठ निरृ
तिं सांगं सपरिवारं सायुधं सशक्तिकं कलशे आवा॰ मोषुणः परापरा नि

रु.
२३

ऋँतिदुर्हणावधीत्॥ पदीष्टत्रक्ष्मयासह॥ इतिमंत्रेणनीलांपताकांनी
लध्वजंचउच्छ्रयेत्॥ असुन्वंतमयजमानमिच्छस्तेनस्येत्यांतस्करस्या
न्वेषि। अन्यस्मदिच्छसादइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु। निर्ऋतये
नमः गंधाद्युपचारान्समर्प्पयामि। निर्ऋतिंखड्गहस्तंचसर्वलोकैकपाव
नं॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतांइतिनत्वा। निर्ऋतयेसांग
यसपरिवारायसायुधायसशक्तिकायएतंमाषभक्तबलिंसमर्पयामि
।ततआचम्यपश्चिमेगत्वा। कलशद्वयंप्रतिद्वारशाखांपूर्ववत्स्थाप
यित्वा। अस्मिन्कलशद्वये अंजनाख्यदिग्गजं आवा०। अंजनाख्यदि

प.
२३

ग्गजायनमः गंधाद्युपचारान्समर्पयामि। तत्रसामवेदिनामृत्विजोप
श्चिमद्वारेशांतिसूक्तजपार्थेत्वामहंवृणे। सामवेदस्यपिंगाक्षोजागतः
शक्रोदेवतः॥ भारद्वाजस्यविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिप्रत्येकंवृत्त्वा॥
अग्नआयाहिवीतयेगृणानोहव्यदातये। निहोतासत्सिबर्हिषीतिमं
त्रेणगंधाद्युपचारान्समर्पयामि। ततोमकरस्थंपाशहस्तंशुक्लवर्णंकि
रीटधारिणंवरुणंध्यात्वा॥ ॐराक्षहियादोगणवारिधीनांगणेनपर्ज
न्यसहाप्सरोभिः। विद्यामरेंद्राधरगीयमानाहिपोत्वमस्मान्भगवन्न
मस्ते॥ भोवरुणइहागच्छइहतिष्ठवरुणंसांगंसपरिवारंसायुधंसशक्ति

रु॰
२४

कं द्वारकलशेवाहयामि॥ इमंमेवरुणश्रुधीहवमद्याचमृलय॥ त्वामव
स्युराचके इतिमंत्रेणश्वेतांपताकांश्वेतध्वजंचछ्रयेत्॥ तत्वायामिब्रह्म
णावंदमानस्तदाशास्तेयजमानोहविर्भिः। अहेलमानोवरुणेहबोध्यु
रुशंसमान आयुःप्रमोषीः। वरुणायनमः गंधाद्युपचारान्समर्पयामि
।पाशहस्तंचवरुणंमंभसांपतिमीश्वरं॥ आवाहयामियज्ञेस्मिन्पूजेयं
प्रतिगृह्यतांइतिनत्वावरुणायसांगायसपरिवारायसायुधायसशक्ति
कायएतंमाषभक्तबलिंसमर्पयामितिबलिंदद्यात्। ततआचम्यवाय
व्यांपूर्ववत्कलशंनिधाय। तत्रपुष्पदंतंआवाहयामि। सिद्धार्थंआवा

प॰
२४

हयामि। पुष्पदंतसिद्धार्थाभ्यांनमः गंधाद्युपचारान्समर्पयामि। मृगाधि
रूढंधूम्रवर्णंचित्रांबरधरंयुवानंवरध्वजधरदक्षिणवामहस्तद्वयंवायुं
ध्यात्वा॥ ओंएह्येहियज्ञेममरक्षणायमृगाधिरूढःसहसिद्धसंघैः॥ प्रा
णाधिपःकालकवेःसहायगृहाणपूजांभगवन्नमस्ते॥ भोवायोइहाग
छइहतिष्टवायुंसांगंसपरिवारंसायुधंसशक्तिकंकलशेआवाहयामि॥ वा
योःशतंहरीणांयुवस्वपोष्याणां। उतवालेसहस्त्रिणोरथ आयातुपा
जेसा इतिमंत्रेणधूम्रांपताकांधूम्रध्वजंचउछ्रयेत्। तववायवृतस्पते
त्वष्टुर्जामातरद्भुत। अवांस्यावृणीमहेवायवेनमः गंधाद्युपचारान्सम
त

रु॰
२५
मं

र्पयामि। वायुमाकाशगंचैवपवनंवेगवद्गतिं॥ आवाहयामियज्ञेस्मिन्पू
जेयंप्रतिगृह्यतां॥ अनाकारोमहौजाश्चयश्चादृष्टिगतिर्दिवि॥ तस्मैप्र
ज्यायजगतोवा[illegible]यवेहत्वंममचेतिनस्त्वा॥ वायवेसांगायसपरिवारा
यसायुधायसशक्तिकायैतंमाषभक्तबलिंसमर्पयामितिबलिंदद्यात्
॥ ततआचम्योत्तरद्वारेकलशद्वयंप्रतिद्वारशाखांप्राग्वत्स्थापयित्वा
॥ तत्रकलशद्वयेसार्वभौमदिग्गजंआवाह०॥ सार्वभौमदिग्गजायन
मः गंधाद्युपचारान्समर्पयामि॥ तत्र अथर्ववेदावृत्विजोउत्तरद्वारे
शांतिसूक्तजपार्थेनत्वामहंवृणे। वृहन्नेत्रोथर्ववेदोनुष्टुभोरुद्रदैव

प॰
२५

तः वैशंपायनविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिप्रत्येकंवृत्वा॥ शंन्नोदेवीर
भिष्टयआपोभवंतुपीतये। शंयोरभिस्रवंतुनः इतिमंत्रेणगंधाद्युपचा
रैः पूजयेत्॥ ततोनरयुतविमानस्थंकुंडलहारकेयूररुचिरांवरगदा
धरदक्षिणवामभुजद्वयंमुकुटिनंमहोदरंमहाकायहरितवर्णंकुबेरं
ध्यात्वा ॐ एह्येहियक्षेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्धं॥ स
र्वौषधीभिः पितृभिः सहैवगृहाणपूजांभगवन्नमस्ते॥ भोसोमइहाग
छइहतिष्ठसोमंसांगंसपरिवारंसायुधंसशक्तिकंकलशेआवा०॥
आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यं॥ भवाजवास्यसंगथेइतिमं

त्रेणहरितांपताकांहरितध्वजंचउछ्रयेत्॥सोमोधेनुंसोमोअर्वंत
माशुंसोमोवीरंकर्मण्यंददाति।सादन्यंविदथ्यंसभेयंपितृश्रवणंयो
ददाशदस्मै।सोमायनमः।गंधाद्युपचारान्समर्पयामि।सर्वनक्षत्रम
ध्येतुसोमोराजाव्यवस्थितः॥तस्मैसोमायदेवायनक्षत्रपतयेनम
इतिनत्वा॥सोमायसांगायसपरिवारायसायुधायसशक्तिकायेतं
माषभक्तबलिंसमर्पयामितिबलिंदद्यात्।ततआचम्येशान्यांग
त्वापूर्ववत्कलशानिधाय।तत्रसुप्रतीकंआवाहयामिमंगलायन
मःमंगलंआवाहयामि।सुप्रतीकमंगलाभ्यांनमः॥गंधाद्युपचारा

न्समर्पयामि।वृषारूढंदक्षिणवामहस्तयोर्वरत्रिशूलधरंत्रिनेत्रं
शुक्लवर्णमीशानंध्यात्वा॥ओंएह्येहिविश्वेश्वरनस्त्रिशूलकपाल
खट्वांगधरेणसार्द्धं॥लोकेनयज्ञेश्वरयज्ञसिद्ध्येगृहाणपूजांभ
गवन्नमस्ते॥भोईशानइहागच्छइहतिष्ठईशानंसांगंसपरिवारं
सायुधंसशक्तिकंकलत्रेआवाहयामि॥अभित्वादेवसवितरी
शानंवार्य्याणां।सदावन्भागमीमहेइतिमंत्रेणश्वेतांपताकांसर्व
वर्णांध्वजंचउछ्रयेत्॥ततसमीशानंजगतस्तस्थुषस्पतिंधियं
जिन्वमवसेहूमहेवयं।पूषानोयथावेदसामसद्वृधेरक्षितापायु

रु॰ २७ | प॰ २७

रुद्रः स्वस्तये। ईशानायनमः गंधाद्युपचारान्समर्पयामि। वृष
स्कंधसमारूढं शूलहस्तं त्रिलोचनं॥ आवाहयामियज्ञेस्मिन्पू
जेयं प्रतिगृह्यतां॥ सर्वाधिपोमहादेव ईशानः शुक्ल ईश्वरः॥ शूल
पाणिर्विरूपाक्षस्तस्मैनित्यंनमोनमः। इतिनत्वा। ईशानायसांगाय
सपरिवारायसायुधायसशक्तिकायेमंमाषभक्तबलिंसमर्पयामी
तिबलिंदद्यात्। ततआचम्येशानपूर्वयोर्मध्ये अधऊर्ध्वदिङ्मय। अनंतं
नागनासीनंफणासप्तकमंडितं। पद्मशंखधरोर्ध्वाधोदक्षिणकरद्व
यं। चक्रगदाधरोर्ध्वाधोवामकरद्वयं। नीलवर्णमनंतंध्यात्वा॥ ओं

एह्येहिपातालधरामरेंद्रनागांगनाकिन्नरगीयमानायक्षोरगेंद्राम
रलोकसंघैरनंतरक्षाध्वरमस्मदीयं। भो अनंत इहागच्छ इहतिष्ठ अ
नंतं सांगंसपरिवारंसायुधंसशक्तिकंआवाहयामि। आयंगौरितिमं
त्रेणधूम्रांपताकां। अनंतायनमः। गंधाद्युपचारान्समर्पयामि॥
योसावनंतरूपेणब्रह्मांडंसचराचरं॥ पुष्पवद्धारयेन्मूर्ध्निस्तस्मैनि
त्यंनमोनमः इतिनत्वा। अनंतायसांगायसपरिवारायसायुधायस
शक्तिकायेमंमाषभक्तबलिंसमर्पयामितिबलिंदद्यात्॥ ततआचम्य
नैर्ऋत्यपश्चिमयोर्मध्ये ऊर्ध्वमुद्दिश्य अक्षसूत्रकुंभमुष्टिधरोर्ध्वाधो

वामकरद्वयं। चतुर्मुखंश्मश्रुलंजटिलंलंबोदरंरक्तवर्णंब्रह्माणंध्या
त्वा॥ ओंएह्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्द्धंपितृदेवताभिः॥सर्व
स्यधातास्यमितप्रभावोविशाधरंनःसततंशिवाय॥भोब्रह्मन्निहागच्छ
इहतिष्ठब्रह्माणंसांगंसपरिवारंसायुधंसशक्तिकंआवाहयामि। ब्र
ह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेन आवः॥सबुध्न्याउपमा
अस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥इतिमंत्रेणरक्तांपताकांरक्त
ध्वजंचउच्छ्रयेत्॥ब्रह्मजज्ञानामितिमंत्रेणब्रह्मणेनमःगंधाद्युपचारा
न्समर्पयामि॥पद्मयोनिश्चतुर्मूर्तिर्वेदावासःपितामहः।यज्ञाध्यक्ष

श्चतुर्वक्त्रःतस्मैनित्यंनमोनमइतिनत्वाब्रह्मणेसांगायसपरिवाराय
सायुधायसशक्तिकायएतंमाषभक्तबलिंदद्यात्॥ततआचम्यमंड
पमध्ये अत्युच्चदंडोदशहस्तदीर्घविस्तृतोमहाध्वजोचित्रवर्णस्य।
इंद्रस्यवृष्णोवरुणस्यराज्ञ आदित्यानांमरुतांशर्द्धउग्रं॥महामनसां
भुवनच्यवघोषोदेवानांजयतामुदस्थात्॥इतिमंत्रेणस्थाप्य।ब्रह्मजज्ञा
नमितिमंत्रेणब्रह्मणेनमःगंधाद्युपचारान्समर्पयामि।ततोमंडपषो
डशस्तंभेषुसर्वेभ्योदेवेभ्योनमः॥वंशेषुकिन्नरेभ्योनमः।एष्टेयन्नगे
भ्योनमइतिपूजयेत्॥ततःपूर्वस्यांदिशिमंडपाद्बहिःकिंचिद्भूमिमुप

वाना

लिप्य। तत्रोपविश्य। त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च॥ ब्रह्मा
विष्णुश्शिवैः सार्द्धं रक्षां कुर्वंतु तानि मे। देवदानवगंधर्वायक्षराक्षसप
न्नगाः। ऋषयो मुनयो गावो देवमातर एव च॥ सर्वे ममाध्वरे रक्षां प्रकुर्वंतु
मुदान्विताः॥ ब्रह्माविष्णुश्च रुद्रश्च क्षेत्रपालो गणैः सह॥ रक्षंतु मे उपंस
र्वे घ्नंतु रक्षांसि सर्वतः। त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः। त्रैलोक्य
स्थेभ्यश्चरेभ्यो भूतेभ्यो नमः। ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ शिवाय नः
ॐ देवेभ्यो नमः ॐ दानवेभ्यो नमः ॐ गंधर्वेभ्यो नमः ॐ यक्षेभ्यो नः
ॐ राक्षसेभ्यो नमः ॐ पन्नगेभ्यो नमः ॐ गोभ्यो नमः ॐ ऋषिभ्यो नः

ॐ मनुष्येभ्यो॰ ॐ देवमातृभ्यो नमः इति प्रत्येकं गंधाद्युपचारान्समर्पयामि। प्रत्येकं माषभक्तबलिं समर्पयामी। इति बलिं दद्यात्॥ ततो यजमानः साचार्यः सकृत्विक्प्रक्षालितपाणिपादराचांतः प्राग्द्वारेण मंडपं विशेद्वोत्॥ ततो यजमानो ग्न्यायतनाद्दक्षिणत उपविश्येत्॥ २
आचार्यस्तत्कुंड उपश्चिमे उपविश्याचम्य प्राणानायम्य॥ मुकर्मेकण्यः भिप्रतिष्ठां करिष्ये॥ तदंगतया संमार्जनमेखलायोनिदेवतास्थापनं च करिष्ये॥ इति संकल्प ग्न्यायतनं संमृज्य कुंडोदके नमेस्य। तदंगं इदं विष्णुरिति मंत्रेणोपरि मेखलायां श्वेतवर्णा लेतोके

रु॰
३०

यां॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥ समूल्हमस्यपांसुरे॥ विष्णुं आवाहयामि॥ मध्येमेखलायांरक्तवर्णायांब्रह्मजज्ञानमितिमंत्रेण ब्रह्माणं आवाह॰॥ अधोमेखलांयांकृष्णवर्णायांकृतायांकद्रुद्राय प्रचेतसेमीढुष्टमायतव्यसे। वोचेमशंतमंहृदे॥ इतिमंत्रेणरुद्र मावा॰॥ योन्यां। गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसा चतुष्पदी। अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन्॥ इतिमंत्रेणगौरीमावाह॰॥ विष्णवेब्रह्मणेरुद्रायगौर्यैनमइतिप्रत्ये कंगंधाद्युपचारान्समर्पयामि॥ एवंकुंडेस्थंडिलेवाग्निप्रणयनवि

प॰
३०

धायालेखेत्स्थं। यज्ञियशाकलमादायदक्षिणेष्टोउदीच्यान्तेप्राच्याम ष्टैमिसंगुलानियत्स्वा। दक्षिणोपक्रमामुदक्संस्थांप्रादेशमात्रामेकां ले। खांतस्यादक्षिणोत्तरयोः प्रागायत पूर्वरेखायासंस्पृष्टेप्रादेश सम्मितेद्वेलेखेलिखित्वातयोर्मध्येपरस्परमसंसृष्टाउदक्संस्थाः प्रागायताःप्रादेशसम्मितास्तिस्रइतिषड्लेखायज्ञियशाकलमूले नदक्षिणहस्तेनोल्लिखेल्लेखासुतच्छकलमुदगग्रंनिधायस्थंडिलम द्भिरभ्युक्ष्यशाकलमाग्नेय्यांनिरस्यपाणिंप्रक्षाल्यवाग्यतोभवेत्॥ तैजसादिपात्रेपिधानंसहितमग्निमानीयस्थंडिलादाग्नेय्यान्दिशि

ल

रु॰
३१

निधाय। जुष्टोदमूना आत्रेयोवसुश्रुतोऽग्निस्त्रिष्टुप्। अग्न्यावाहने वि॰
ॐ जुष्टोदमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान्॥ विश्वा अ
ग्ने अभियुजो विहत्या शत्रूयतामाभरा भोजनानि॥ एह्यग्ने राहुगणो
गोतमोग्निस्त्रिष्टुप् अग्न्यावाहने। ॐ एह्यग्न इह होता निषीदादब्धः सु
पुरएता भवा नः। अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय दे
वान्॥ भूर्भुवः स्वरोमग्निं प्रतिष्ठाप्य। चत्वारि शृंगा वामदेवोग्निस्त्रि
ष्टुप्। अग्निमूर्तिध्याने विनियोगः॥ ॐ चत्वारि शृंगा त्रयो अस्य पा
दा द्वे शीर्षे सप्त हस्तासो अस्य॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो

प॰
३१

मर्त्यां आविवेश॥ सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः। त्रि
पात्प्रसन्नवदनः सुखासीनः शुचिःस्मितः। स्वाहां तु दक्षिणे पा
र्श्वे देवीं वामे स्वधां तथा। बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रु
वं। तोमरं व्यजनं वामे घृतपात्रं च धारयेत्॥ आत्माभिमुखमासी
न एवंरूपो हुताशनः॥ एषा हि देवः प्रदिशोनु सर्वाः पूर्वो हि जातः
स उ गर्भे अंतः। स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठ
ति विश्वतोमुखः॥ अग्ने वैश्वानर शांडिल्यगोत्र मेषध्वज प्राङ्मु
ख मम संमुखो भव। ततो ग्रहवेद्यां देवतास्थापनं कुर्यात्॥ सान्वकं

रु.
३२

डा षट्त्रिंशादंगुलोपरीशानभागे मूर्द्धि सा सार्द्धहस्तविस्तृता चतु
रस्रा प्रागुदक्प्रवणा वप्रत्रयोपरि द्व्यांगुलोच्चा कार्य्या। तस्याः प्रथ
मो वप्रो द्व्यंगुलोच्छ्रायो द्वितीयस्तृतीयोप्यंगुलोच्छ्रायो त्रयोपि द्व्यंगु
लविस्तारा कार्य्याः। एवं च वप्रैः सहाष्टादशांगुलोन्नता भवंति। तस्यां
च देवतावाहनं कुर्यात्॥ तत्रादौ सर्वतोभद्रं देवतास्थानं तत्प्रकारमा
ह। प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशति॥ खंडेंदुस्त्रिपदैः
कोणेश्रृंखला पंचभिः पदैः॥ एकादशपदा वल्ली भद्रं तु नवभिः प
दैः। चतुर्विंशास्पदा वापि परिधिर्विंशकैः पदैः॥ मध्ये षोडशभिः

प.
३२

कोष्टैः पद्ममष्टदलस्मृतं। श्वेतेंदुः श्रृंखला कृष्णा वल्ली नीलेन पूरये
त्॥ भद्रारूक्षेणाग्निना वापि परिधिः पितवर्णकः॥ बाह्यांतरदलम्वे
ताकर्णिकापीतवर्णका॥ परिध्यावेष्टितं पद्मं बाह्ये सत्वरजस्तमः॥
तन्मध्ये स्थापयेद्देवान्ब्रह्माद्यांश्च सुरासुरान्॥ तत्र पंचवर्णान्युक्ता
नि पंचरात्रे। रजांसि पंचवर्णानि मंडलार्थं हि कारयेत्॥ शालितंदु
लचूर्णेन शुक्लं वा यवसंभवं॥ रक्तं कुसुंभसिंदूरं गैरिकादि समुद्भ
वं॥ हरितालोद्भवं पीतं रजनीसंभवं क्वचित्॥ कृष्णं दग्धैर्यवैः कार्यं
हरितं कृष्णपीतजं॥ रजनी हरिद्रा॥ ततः। देवतावाहनं। यथा॥ ब्र

रु॰
३३

ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्॥ ब्रह्मावाहनेवि॰ ॐ ब्रह्म
जज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेन आवः सबुध्न्याउपमाअ
स्यविष्ठाः सतश्चयोनिमसतश्चविवः॥ मध्येब्रह्माणंप्रतिष्ठाप्य॥
आप्यायस्वराहूगणोगौतमः सोमोगायत्री। सोमावाहनेवि॰॥ ॐ
आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यं॥ भवावाजस्यसंगथे। उ
त्तरेसोमं आवाहयामि॰२। अभित्वाजीगर्तः शुनःशेपईशानो
गायत्री। ईशानावाहनेवि॰ ॐ अभित्वादेवसवितरीशानंवार्य्या
णां। सदावन्भागमीमहे। ईशान्यामीशानं आवा॰॥३॥ इंद्रंवोम

प॰
३३

धुछंदाइंद्रोगायत्री। इंद्रावाहने॰। ॐ इंद्रंवोविश्वतस्परिहवामहेज
नेभ्यः। अस्माकमस्तुकेवलः। पूर्वेइंद्रं आवा॰॥४॥ अग्निंकण्वोमेधा
तिथिरग्निर्गायत्री। अग्न्यावाहनेवि॰॥ ॐ अग्निंदूतंवृणीमहेहो
तारंविश्ववेदसं। अस्ययज्ञस्यसुक्रतुं। आग्नेयामग्निं आवाह॰॥
पशुपतये॥ रुद्रायनः॥ उग्राय॥ भीमाय॥ महते॥ अनंताय॥ वासुक
ये॥ तक्षकाय॥ कुलिराय॥ कर्कोटकाय॥ शंखपालाय॥ कंबलाय॥ अ
श्वतराय॥ वैन्याय॥ पृथवे॥ हैहयाय॥ अर्जुनाय॥ शाकुंतलेयाय॥

प॰
७०

भरतायनः॥ नलाय॥ रामाय॥ हिमवते॥ निषधाय॥ विंध्याय॥ निर्ऋतये॥
वरुणायनः॥ वायवेनमः॥ कुबेरायनमः॥ ईशानाय॥ ब्राह्म्यैनमः॥ स्वाहायैन
मः॥ वाराह्यैनमः॥ खड्गिन्यैनमः॥ वारुण्यैनमः॥ वायव्यैनमः॥ कौबेर्यैनमः॥
ईशान्यैनमः॥ वज्रायनमः॥ शक्तयेनमः॥ दंडाय॥ खड्गाय॥ पाशाय॥
अंकुशाय॥ गदायैनः॥ त्रिशूलाय॥ ऐरावताय॥ मेषाय॥ महिषाय॥
प्रेताय॥ मकराय॥ हरिणाय॥ नरायनः॥ वृषभाय॥ ऐरावताय॥ पुंड
रिकाय॥ वामनाय॥ कुमुदाय॥ अंजनाय॥ पुष्पदंताय॥ सार्वभौमाय॥
सुप्रतीकाय॥ इंद्राय॥ अग्नये॥ विरूपाक्षाय॥ यमायनः॥ निर्ऋतयेनः॥

रु.
७१

विश्वरूपायनम ॥ वरुणाय ॥ वामवे ॥ पशुपतये ॥ कुबेरायन ॥ ईशा
नाय ॥ उर्ध्वलिंगाय ॥ शेषाय ॥ तक्षकाय ॥ अनंताय ॥ वासुकये ॥ शं
खपालाय ॥ महापद्माय ॥ कंबलाय ॥ कर्कोटकाय ॥ एवमाज्याहुत्य
नंतरंस्विष्टकृद्याश्चेतिनवाहुतीश्चहुत्वा ॥ ततोयजमानोबलिदानं
कुर्यात् ॥ तच्चैवं ॥ आग्न्यायतनस्यासमंतादि । क्षुविदिक्षुचमाषभक्त
बलिंसदीपंदिक्पालेभ्योदद्यात् ॥ ॥ त्रातारमिंद्रंगर्गइंद्रस्त्रिष्टुप् । इंद्र
प्रीत्यर्थंबलिदानेविनियोगः ॥ ॐ त्रातारमिंद्रमवितारमिंद्रंहवेहवेसु
हवंशूरमिंद्रं । ह्वयामिशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः ॥ १ ॥

प.
७१

इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायइमंसदीपंमाषभक्तबलिंसम
र्पयामि ॥ भोइंद्रदिशंरक्षबलिंभक्षयजमानस्यवासकुटुंबस्यायुःकर्ताक्षेम
कर्ताशुभकर्ताशांतिकर्ताभवेतिपुष्पाक्षतजलानिपूर्वाभिमुखत्सृजेत् ॥ अ
ग्निकण्वामेधातिथिरग्निर्गायत्री ॥ अग्नीप्रीत्यर्थंबलिदानेविनियोगः ॥
अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं ॥ अस्ययज्ञस्यसुक्रतुं ॥ अग्नयेसां
गाय ॥ भोअग्नेदिशंरक्ष ॥ ततोदक्षिणेयमायसोमंयमोयमोनुष्टुप् ।
यमप्रीत्यर्थंबलिदानेविनियोगः ॥ यमायसोमंसुनुतयमायजुहुताहविः ॥
यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः ॥ यमायसांगायसपरिवारायसायु

धाय॰॥ भोयमदिग्नंरक्ष॰॥ ततोनिर्ऋत्यमोषुणोघोरः कण्वोनिर्ऋतिर्गाय
त्री। निर्ऋतयेसांगाय॰॥ भोनिर्ऋतेदिग्नंरक्ष॰॥ ततः पश्चिमे। तत्वायामि
शुनः शेपोवरुणस्त्रिष्टुप्। वरुणप्रीत्यर्थंबलिं॰॥ तत्वायामिब्रह्मणावंदमा
नस्तदाशास्तेयजमानोहविर्भिः॥ अहेलमानोवरुणेहवोध्युरुशंसमा
न आयुः प्रमोषीः॥ वरुणायसांगाय॰। भोवरुणदिग्नंरक्ष॰॥ ततोवाय
व्ये। तववायोव्यश्वांगिरसोवायुर्गायत्रीवायुप्रीत्यर्थंबलिं॰॥ ॐ तववा
यवृतस्पतेत्वष्टुर्जामातरद्भुत॥ अवांस्यावृणीमहे॥ वायवेसांगायस
प॰॥ भोवायोहिग्नं॰॥ ततोउत्तरे। सोमोधेनुंगोतमः सोमस्त्रिष्टुप्। सो

मप्रीत्यर्थंब॰॥ ॐ सोमोधेनुंसोमो अर्वंतमाशुंसोमोवीरंकर्मण्यंददाति॥
सादन्यंविदथ्यंसभेयंपितृश्रवणंयोददाशदस्मै॥ सोमाय॰। भोसोमदि
ग्नंरक्ष॰॥ ततइशान्ये। तमीशानंगोतमईशानोजगती॥ ईशानप्रीत्य
र्थंबलिं॰॥ तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं॥
पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये॥ ईशानाय
सांगायसपरि॰॥ भोईशानदिग्नंरक्ष॰॥ ततईशानपूर्वयोर्मध्ये आयं
गोः सार्पराज्ञीसर्पागायत्री अनंतप्रीत्यर्थंबलिं॰॥ आयंगोः पृश्निरक्र
मीदसदन्मातरंपुरः॥ पितरंचप्रयन्त्स्वः॥ अनंतायसांगायसपरिवा

राय॰॥ भो अनंतदिग्वांरक्ष॰॥ किंचितु तत्र स्योनापृथिवीत्यनेनमंत्रेणा
नंतबलिमाहुः॥ स्योनापृथिविर्मेधातिथिर्भूमिर्गायत्री भूमीप्रीत्यर्थंब॰॥ स्योना
पृथिवी भवानृक्षरानिवेशनि। यच्छानः शर्मसप्रथाः॥ भूम्यैसांगायसप
रिवारायै॰॥ भो भूमे इमंबलिंगृहाण॰॥ पश्चिमनिर्ऋतिमध्येब्रह्मज
ज्ञानंगौतमोवामदेवो ब्रह्मात्रिष्टुप् ब्रह्मप्रीत्यर्थंबलि॰॥ ब्रह्मजज्ञानंब्र
ह्मणेसांगाय॰॥ भोब्रह्मन्निमंस॰॥ ततोग्रहदेवैः समंतादृहबलयोदेयाः
तत्रपूर्वे॥ ॥आकृष्णेनहिरण्यस्तूपः सविता त्रिष्टुप्। सूर्यप्रीत्यर्थंब॰॥
ॐ आकृष्णेनरजसा॰॥ आदित्यार्थसांगायसपरिवारायसायुधाय

सशक्तिकायईश्वराग्निरूपाधिदेवताप्रत्यधिदेवतासहितायेमंसदी
पमाषभक्तबलिंसमर्पयामीतिपुष्पाक्षतजलंक्षिपेत्॥ भोरवेइमंबलिं
गृहाणममयजमानस्यवासकुटुंबस्यायुःकर्ताक्षेमकर्ताशांतिकर्ताभव
एवमुत्तरत्रापि। ततोवेद्याग्नेये। आप्यायस्वगौतमः सोमोगायत्रीसोम
प्रीत्यर्थंब॰॥ ॐ आप्यायस्वसमे॰ इमंबलिं॰॥ सोमायसांगाय॰॥ उमा
आत्मरूपाधिदेवताप्रत्यधिदेवतासहितायइमंसदीपंमाषभक्तबलिं॰
गृहाण ततोदक्षिणे। अग्निर्मूर्धाविरूपांगारकोगायत्री। अंगारकप्री
त्यर्थंब॰। अग्निर्मूर्धादिवःककुत्पतिः। भौमायसांगायसपरिवाराय

रु॰
७४

सायुधाय॰। स्कंद भूमिरूपाधिदेवताप्रत्यधिदेवतासहिताय इमं॰ ॥भो
अंगारक इमं॰ ॥ ततः ईशान्ये। उद्बुध्यध्वं बुधः सौम्यस्त्रिष्टुप् बुधप्रीत्यर्थे
ब॰ ॥ ॐ उद्बुध्यध्वं समनसः सखायः॰ ॥ बुधाय॰ ॥ नारायणविष्णुरूपा
धिदेवतासहिताय इमं भो बुध इमं ब॰ ॥ ततः उत्तरे ॥ बृहस्पतेगृत्स
मदो बृहस्पतिस्त्रिष्टुप्। बृहस्पतिप्रीत्यर्थे ब॰ ॥ ब्रहस्पते अतियदर्यो
अर्हात्॰। बृहस्पतये सांगाय सप॰ ॥ ब्रह्मेंद्ररूपाधिदेवतासहिताय॰ ॥
इमं॰। भो बृहस्पते इमं बलिं॰ ॥ ततः पूर्वे। शुक्रः पाराशरः शुक्रो वैद्विपदा
विराट् ॥ शुक्रप्रीत्यर्थे ॥ ॐ शुक्रः शुशुक्वान्। शुक्राय सांगाय सपरिवा

प॰
७४

राय॰। इंद्रेंद्राणीरूपाधिदेवताप्रत्यधिदेवतासहिताय इमं॰ भो शुक्र इमं॰ ॥ त
ततः पश्चिमे। शमग्निरिरिंबिटिः शनिरुष्णिक्। शनिप्रीत्यर्थे ब॰ ॥ शमग्नि
रग्निभिः कर॰। शनैश्चराय सांगाय॰। यमप्रजापतिरूपाधिदेवताप्रत्य
धिदेवतासहिताय इमं॰ भो शनि इमं ब॰ ॥ ततो नैर्ऋत्ये। कयानो वाम
देवो राहुर्गायत्री। राहुप्रीत्यर्थे ब॰। ॐ कयानश्चित्र॰ ॥ राहवे सांगाय
स॰। कालसर्परूपाधिदेवताप्रत्यधिदेवतासहिताय इमं॰ ॥ भो राहो इ
मं॰ ॥ ततो वायव्ये। केतुं मधुच्छंदः केतवो गायत्री केतुभ्यः प्रीत्यर्थे ब॰ ॥
ॐ केतुं कृण्वन्न केतुभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्ति
केभ्यश्चित्रगुप्तब्रह्मरूपाधिदेवतासहितेभ्यः इमं सदीपं माषभक्तं ब॰ ॥

रु॰ ७५

भोभोकेतवः इमंबलिंगृह्णंतंममयजमानस्यवासुकुटुंबस्यायुःकर्त्ता
क्षेमकर्त्ताशुभकर्त्ताशांतिकर्त्ताभव॥ ॥अथवेद्युतरैतोगुणपतयेस्या
दिपंचकस्यगणानांत्वागृत्समदोगणपतिर्जगती। गणपतिप्रीत्यर्थं
ब॰॥ॐगणानांत्वागणपतिंहवामहे॰ गणपतयेसांगायसपरीवा
राय॰। ऋद्धिबुद्धिसहितायेमंसदीपंमाषभक्तबलिं॰॥भोविनायक
इमंबलिं॰॥जातवेदसेकश्यपोदुर्गात्रिष्टुप्। दुर्गाप्रीत्यर्थंबलिं॰।जा
तवेदसो॰॥दुर्गायैसांगायैसपरिवारायैसायुधायैसशक्तिकायै॰॥
इमंसदीपंमाषभक्तबलिं॰॥भोदुर्गेइमंबलिंगृहाण॰॥तववायोव्या
श्वांगिरसोवायुर्गायत्री॰॥वायुप्रीत्यर्थंबलिं॰॥ॐतववायवृतस्प

प॰ ७५

ते॰॥वायवेसांगायसपरिवारायसायुधायसशक्तिकायइमं॰॥भोवा
योइमंबलिंगृहाण॰। अदिद्वत्सआकाशोगायत्री। आकाशप्रीत्यर्थं
ब॰।आदित्प्रत्नस्यरेतसो॰आकाशायसांगाय॰।भोआकाशइमंबलिं॰॥
एषोउषाप्रस्कण्वोश्विनौगायत्री।अश्विनौप्रीत्यर्थंब॰॥ॐएषोउषा
अपूर्व्या।अश्विभ्यांसांगाभ्यांसपरिवारा॰भ्यांसायुधाभ्यांसशक्ति
काभ्यांइमंसदीपं॰।भोभोअश्विनौइमंबलिंगृह्णीतंममयजमानस्य
वासकुटुंबस्यायुःकर्त्ताक्षेमकर्त्तारौशुभकर्त्तारौशांतिकर्त्तारौभवतं
॥वास्तोष्पतयेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्।वास्तोष्पतिप्रीत्यर्थंब॰॥
ॐवास्तोष्पतेप्रतिजानीह्यस्मान्।वास्तोष्पतयेसांगाय॰भोवास्तो

ष्पते इमं बलिं गृहाण ॥ ततो रुद्रपीठस्याग्रे ॥ कद्रुद्रायघोरः कण्वो रुद्रो गा
यत्री ॥ रुद्रप्रीत्यर्थं ब० ॥ ॐ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे ॥ वोचे
म शंतमं हृदे ॥ रुद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय उ
मासहिताय इमं सदीपं माषभक्तब० ॥ भो रुद्र इमं बलिं गृहाण ॥ साम
ध्वनिशरीरस्त्वं वाहनं परमेष्ठिनः विषयापहरो नित्यमतः शांतिं प्रयच्छ
मे । गरुत्मते सांगाय सपरिवाराय सायुधाय सशक्तिकाय० ॥ भो गरुत्मा
नृ इमं बलिं गृह । इदं तु लक्षहोमे । ततो महाबलिं कुंकुमादिरक्तं रक्तपु
ष्पादियुतं सदीपं सदक्षिणं क्षेत्रपालाय दद्यात् ॥ क्षेत्रस्य वामदेवः क्षेत्रपालो
नुष्टुप् । क्षेत्रपालप्रीत्यर्थे० क्षेत्रस्यपतिना वयं हितेनेव जयामसि ॥ गाम

श्वं पोषयित्न्वा स नो मृळातीदृशे ॥ क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशा
किनीडाकिनीवेतालादिपरिवारयुताय इमं सदीपं माषभक्तबलिं० ॥ भो
भो क्षेत्रपाल इमं बलिं गृहाण यजमानस्य वा सकुटुंबस्य आयुःकर्ता क्षेम
कर्ता शुभकर्ता शांतिदः पुष्टिदस्तुष्टिदो भव ॥ इमं बलिं शूद्रेण यजदब्रा
ह्मणेन वा चतुष्पथे क्षेपयेत् ॥ ततः प्रक्षालितपाणिपादः ॥ आचम्य दे
शकालौ स्मृत्वा कृतस्यामुकहोमस्य पूर्णतासिध्यर्थं पूर्णाहुतिं होष्ये ॥
इति संकल्प्य स्रुचि द्वादशगृहीतं चतुर्गृहीतं वा आज्यं गृहीत्वा वस्त्रयुतं
नारिकेलादिफलं चंदनमालादियुतं तदुपरि निधाय पूर्णाहुतिं यजमा
नान्वारब्ध आचार्यो जुहुयात् ॥ तत्र मंत्राः ॥ ॥ समुद्रादूर्मिर्मधुमाँ

रु. ७७ प.

उदारदुपांशुनासममृतत्वमानट्॥ घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाम
मृतनाभिः॥वयंनामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः॥उ
पब्रह्माशृणवच्छस्यमानंचतुःशृंगोवमीद्गौरएतत्॥ चत्वारिशृंगात्रयो
अस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य॥ त्रिधाबद्धोवृषभोरोरवीतिमहो
देवोमर्त्याँआविवेश॥ मूर्द्धानंदिवोबार्हस्पत्योभारद्वाजोवैश्वानरस्त्रि
ष्टुप्पूर्णाहुतिहोमेविनियोगः॥ॐमूर्द्धानंदिवोअरतिंपृथिव्यावैश्वान
रमृतआजातमग्निं॥कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयं
तदेवाः॥पुनस्त्वाग्निर्वसुरुद्रआदित्याःशतक्रतुस्त्रिष्टुप्॥पूर्णाहुति
होमेविनियोगः॥पुनस्त्वादित्यारुद्रावसवःसमिंधतांपुनर्ब्रह्माणोव

७७

सुनीथयज्ञैः॥घृतेनत्वंतनुवोवर्द्धयस्वसत्याःसंतुयजमानस्यकामाः॥
पूर्णादर्विविश्वेदेवाःशतक्रतुरनुष्टुप्।पूर्णाहुतिहोमेविनियोगः॥पूर्णा
दर्विपरापतसुपूर्णापुनरापत॥वस्नेवविक्रीणावहाइषमूर्जंशतक्रतो॥
सप्ततेअग्नेसप्तवानस्तिर्जगती।पूर्णाहुतिहोमे॥ॐसप्ततेअग्नेस
मिधःसप्तजिह्वाःसप्तऋषयःसप्तधामप्रियाणि॥सप्तहोत्राःसप्तधा
त्वायजंतिसप्तयोनिरापृणस्वाघृतेन॥धामंतेवामदेवआयोजगती
पूर्णाहुतिहोमे॥ॐधामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रेहृद्यंतरा
युषि॥अपामनीकेसमिथेयआभृतस्तमश्याममधुमंतंतऊर्मिंस्वाहा
कारेणाग्नौक्षिपेत्॥पूर्णाहुतिमुत्तमांजुहोति॥सर्वंवैपूर्णाहुतिः॥

सर्वमेवाप्नोति॥ अथ। इमं वै पूर्णाहुतिः। अस्यामेव प्रतिष्ठति॥ अ
थ यजमानस्त्रः॥ इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रत
वे सत्यवते अग्नये अद्भ्यश्च न मम इति त्यागं कुर्यात्॥ ॥ततो वसोर्द्धारा॥ त
त्र मंत्रक्रमः॥ वन्हेरुपरि स्तंभद्वयं विधतौ औदुंबरीं ऋज्वीं सकोटरां बा
हुप्रमाणामार्द्रां स्रुचं पूर्वाग्रं निधाय। तदुपरि स्थं खलाविध्यतेन कुंभेन नि
र्मलघृतपूरितेन ताम्रमृदादिकुंभेन निधाय यवमात्रछिद्रेणाज्यं मुंचेत्।
ऽग्नेरुपरि वसोर्द्धारां पातयेत्। तस्यां च घृतधारायां स्रुक्प्रनालिकायां
ऽग्नो पतंत्यां अग्नेयादि निसूक्तानि श्रावयेत्॥ अथ चमकानुवाकाना
मग्निः का॰ उ ऋषिः आद्या आग्नावैष्णवी गायत्री शिष्टानां वाजादयो

न्नादि विन्नोषा देवता यजुः वसोर्द्धाराया विनियोगः॥ अग्निमीळ इति
नवानां वैश्वामित्रो मधुछंदा ऋषिः अग्निर्देवता गायत्री छंदः। वसोर्द्धा
रायां वि॰॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं। होतारं रत्नधातमं
अग्निः पूर्वेभिर्ऋषिभीरीड्यो नूतनैरुत। स देवाँ २ एह वक्षति। अग्नि
ना रयिमश्नवत्पोषमेव दिवे दिवे॥ यशसं वीरवत्तमं। अग्ने यं यज्ञमध्व
रं विश्वतः परिभूरसि॥ स इद्देवेषु गच्छति। अग्निर्होता कविक्रतुः सत्य
श्चित्रश्रवस्तमः॥ देवो देवेभिरागमत्॥ १॥ यदंग दाशुषे त्वमग्ने भद्रं क
रिष्यसि। तवेत्तत्सत्यमंगिरः॥ उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयं। न
मो भरंत एमसि। राजंतमध्वराणां गोपामृतस्य दीदिविं। वर्द्धमानं स्वे दमे

रु.
७९

प.

।सनःपितेवसूनवेग्नेसूपायनोभव।सचस्वानःस्वस्तये॥२॥विष्णो
र्नुकमितिषण्णांऔचथ्योदीर्घतमाविष्णुस्त्रिष्टुप्।वसोर्द्धारायांविनि
योगः।विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजांसि।यो
अस्कभायदुत्तरंसधस्थंविचक्रमाणस्त्रेधोरुगायः।प्रतद्विष्णु
स्तवतेवीर्येणमृगोनभीमःकुचरोगिरिष्ठाः।यस्योरुषुत्रिषुविक्र
मणेष्वधिक्षियंतिभुवनानिविश्वा।प्रविष्णवेशूषमेतुमन्मगिरिक्षि
तउरुगायायविष्णवे॥यइदंदीर्घंप्रयतंसधस्थमेकोविममेत्रिभि
रित्पदेभिः॥यस्यत्रिपूर्णामधुनापदान्यक्षीयमाणास्वधयामदंति।
यउत्रिधातुपृथिवीमुतद्यामेकोदाधारभुवनानिविश्वा।तदस्यप्रि

७९

यमभिपाथोअश्यांनरोयत्रदेवयवोमदंति।उरुक्रमस्यसहिबंधुरि
त्थाविष्णोःपदेपरमेमध्वउत्सः॥तावांवास्तून्युश्मसिगमध्यैयत्रगा
वोभूरिशृंगाअयासः।अत्राहतदुरुगायस्यवृष्णःपरमंपदमवभाति
भूरि॥६॥आतेपितरितिपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप्।वसोर्द्धा
रायांवि०॥ॐआतेपितर्मरुतांसुम्नमेतुमानःसूर्यस्यसंदृशोयुयो
थाः।अभिनोवीरोअर्वतिक्षमेतप्रजायेमहिरुद्रप्रजाभिः॥त्वाद
त्तेभीरुद्रशंतमेभिःशतंहिमाअशीयभेषजेभिः।व्य१स्मद्द्वेषोवितरं
व्यंहोव्यमीवाश्चातयस्वाविषूचीः।श्रेष्ठोजातस्यरुद्रश्रियासितव
स्तमस्तवसांवज्रबाहो।पर्षिणःपारमंहसःस्वस्तिविश्वाअभितीर

अ

रु
९०

रपसोयुयोधि। मात्वारुद्र चक्रुधामा नमोभिर्मादुष्टुती वृषभमासहूति
।उन्नोवीराँ ऽअर्पय भेषजेभिर्भिषक्तमं त्वाभिषजांशृणोमि॥ हवीमभि
र्हवते योहविर्भिरवस्तोमेभीरुद्रंदिषीय॥ ऋदूदरः सुहवोमानोअस्यै
बभ्रुः सुशिप्रोरीरधन्मनायै॥१॥ उन्मामम्मंदवृषभोमरुत्वान्त्वक्षीयसा
वयसानाधमानं॥ घृणीवच्छायामरपा अशीयाविवासेयंरुद्रस्यसु
म्नं। ध॥१ क्वस्यतेरुद्रमृळयाकुर्हस्तोयोअस्तिभेषजोजलाषः। अपभर्त्तारपसो
दैव्यस्याभीनुमावृषभचक्षमीथाः। प्रबभ्रवेवृषभायश्वितीचेमहोम
हींसुष्टुतिमीरयामि। नमस्याकल्मलीकिनंनमोभिर्गृणीमसित्वेषंरु
द्रस्यनाम। स्थिरेभिरंगैः पुरुरूपउग्रोबभ्रुः शुक्रेभिः पिपिशेहिरण्यैः॥

५
९०

ईशानादस्यभुवनस्यभूरेर्न्नवाउयोषद्रुद्रादसुर्यं॥ अर्हन्बिभर्षि
सायकानिधन्वाऽर्हन्निष्कंयजतंविश्वरूपं॥ अर्हन्निदंदयसेविश्व
मभ्वंन्नवाऔंजीयोरुद्रत्वदस्ति॥२॥ स्तुहिश्रुतंगर्तसदंयुवानंमृग
न्नभीममुपहत्नुमुग्रं। मृळाजरित्रेरुद्रस्तवानोऽन्यंतेअस्मन्निवपंतुसे
नाः॥ कुमारश्चित्पितरंवंदमानंप्रतिनानामरुद्रोपयंतं। भूरेर्दातारंसत्प
तिंगृणीषेस्तुतस्त्वंभेषजारास्यस्मे। यावोभेषजामरुतःशुचीनियाशं
तमावृषणोयामयोभु॥ यानिमनुरवृणीतापिता नस्ताशंचयोश्व
रुद्रस्यवश्मि। परिणोहेतिरुद्रस्यवृज्याः परित्वेषस्यदुर्मतिर्महीगात्॥
अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृळ॥ एवाबभ्रो

वृषभ चेकिलानयथादेवनहृणीषेनहंसि। हवनश्रुन्नोरुद्रेहबोधि
बृहद्वदेमविदथेसुवीराः॥३॥स्वादिष्टयेदस्रानांवैश्वामित्रोनधुछं
दाः पवमानः सोमोगायत्री। वसोर्द्धारायांवि॰॥ ॐ स्वादिष्टयाम
दिष्टयापवस्वसोमधारया॥इंद्रायपातवेसुतः॥ रक्षोहाविश्वचर्ष
णिरभियोनिमयोहतं। द्रुणासधस्थमासदत्॥वरिवोधातमोभवमं
हिष्टोवृत्रहंतमः॥पर्षिराधोमघोनां। अभ्यर्षमहानांदेवानांवीति
मंधसा॥अभिवाजमुतश्रवः॥त्वामछाचरामसितदिदर्थंदिवेदिवे
॥इंद्रेत्वेन आशासः॥१॥पुनातितेपरिस्रुतंसोमंसूर्यस्यदुहिता॥वा
रेणशश्वतातना। तमीमण्वीः समर्यआगृभ्णंतियोषणोदश॥स्वसा

रः पार्येदिवि। तमीहिन्वंत्युग्रुवोधमंतिबाकुरंदृतिं॥त्रिधातुवारणं
मधु। अभी३ममघ्न्याउतश्रीणंतिधेनवः शिशुं॥सोममिंद्रायपातवे
। अस्येदिंद्रोमदेष्वाविश्वावृत्राणिजिघ्नते। शूरोमघाचमंहते॥२॥
वसोर्द्धारांजुहोतिवसोर्मेधारासदितिवाएषाहूयतेघृतस्यवाएन
मेषाधारामुष्मिंल्लोकेपिन्वमानोपतिष्ठत आज्येनजुहोतितेजोवाआ
ज्यंतेजोवसोर्द्धारातेजसैवास्मैतेजोवरुंधेथोकामावैवसोर्द्धारा
कामानेवावरुंधेयंकामयेतप्राणानस्यांनाद्यंविछिंद्यामितिवियाहं
तस्यजुहुयात्प्राणानेवास्यांनाद्यंविछिनत्तियंकामयेतप्राणानस्यां
नाद्यं संतनुयामितिसंततांतस्यजुहुयात्प्राणानेवास्यांनाद्यं ९ सं

रु॰
९२

तनोति द्वादश द्वादशानि जुहोति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मा
अन्नमवरुंधेन्नं च मे शुच्च म इत्याहैतद्वा अन्नस्य रूपꣳ रूपेणैवान्नमवरुं
धेग्निश्च म आपश्च म इत्याहैषा वा अन्नस्य योनिः सयोन्येवान्नमवरुंधेर्द्धेंद्रा
णि जुहोति देवता एवावरुंधे यत्सर्वेषामर्द्धमिंद्रः प्रति तस्मादिंद्रो देवतानां
भूयिष्ठभाक्तम इंद्रमुत्तरमाहेंद्रियमेवास्मिन्नुपरिष्टाद्दधाति यज्ञायुधानि
जुहोति यज्ञो वै यज्ञायुधानि यज्ञमेवावरुंधेथो एतद्वै यज्ञस्य रूपꣳ रूपे
णैव यज्ञमवरुंधेवभृथश्च मे स्वगाकारश्च म इत्याह स्वगाकृत्या अग्निश्च मे
घर्मश्च म इत्याहैतद्वै ब्रह्मवर्चसस्य रूपꣳ रूपेणैव ब्रह्मवर्चसमवरुंधर्
क्च मे साम च म इत्याहैतद्वै छंदसाꣳ रूपꣳ रूपेणैव छंदाꣳस्यवरुंधे गर्भा

प॰
९२

रूप॰

श्च मे वत्साश्च म इत्याहैतद्वै पशूनाꣳ रूपेणैव पशूनवरुंधे कल्पांजुहो
त्यक्लृप्तस्य क्लृप्त्यै युग्मदयुजे जुहोति मिथुनत्वायोत्तरावती भवतोभिक्रांत्या
एका च मे तिस्रश्च म इत्याह देवछंदसं वा एका च मे तिस्रश्च मनुष्यछंदसं
चतस्रश्चाष्टौ च देवछंदसं चैव मनुष्यछंदसं चावरुंध आत्रयस्त्रिꣳश
तो जुहोति त्रयस्त्रिꣳशद्वै देवता देवता एवावरुंध अष्टाचत्वारिꣳश
तो जुहोत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै
पशूँनवरुंधे वाजश्च प्रसवश्चेति द्वादशं जुहोति द्वादश मासाः संवत्स
रः संवत्सर एव प्रतितिष्ठति ॥ ॥ महावैश्वानरं नाम महावैश्वानराख्य आरण्य
के षष्ठप्रपाठके पठितं साम द्वयं महावैश्वानरो देवता पथ्याबृहती छंदः

९ संवत्सर

रु·
६३

प·

वसोर्द्धारायांवि॰।ज्येष्टसाम्नो।भरद्वाजऋषिः वैश्वानरोदेवतात्रिष्टुपूछं
दः।वसोर्द्धारायांवि॰॥ॐ ३१मू ॐ ३१ औयूः।औयूः।औयूः।ज्यौनीः।
ज्यौलिः।ज्यौतीः।ज्यौतौवा।ज्यौनौवा।ज्यौनौवा।होइ।ज्यौनौवाहोइ।ज्यौ
तौवा ३ होऊवो।इहेस्ववैश्वानराय प्रेतिन्नौज्यौतिर्बृहत्।इदेरिदा।
सैत्येम्।सैत्यं।सैत्यौवा।सैत्यौवा।सैत्योवा।सैत्यौवाहोइ।सैत्यौवौ ३ हो
उवौ।इहेस्ववैश्वानरायप्रेदिन्नौज्योतिर्बृहत्।कौयमानोवनालुवाम्ः
लुवाम्।लुवाम्।लुवाम्।लुयोवा।लुयोवा।लुवोवा।लुयोवाहाइ।लुयोवाहाइ।

६३

लुयोवाहाइ।लुयोवा ३ हाऊवा॥इस्वेहेवैश्वानरायप्रदिन्नोज्योतिर्बृहत्॥ॐ
३१मू।आयूः।ज्योतीः।३।ज्योतोवा।३।ज्योतोवा।हाइ।ज्योतोवा ३।हाउ।वा।

इहस्ववैश्वारनायप्रदिन्नोज्योतिर्बृहत्।द्यौर्भूतं पृथिवीं।पृथिवीं।पृथिवीं।
पृथिव्योवा।पृथिव्योवा।पृथिव्योवा।हाइ।पृथिव्योवाहाइ।पृथिव्योवा ३
हाऊ।वा।इहस्ववैश्वानरायप्रदिन्नोज्योतिर्बृहत्॥यन्मात्तूरजगन्नपाः।
अपाः।आपः।आपः।आपोवा।आपोवा।आपोवा।आपोवाहाइ।३
अपोवाहाइ।अपोवा ३ हाऊवा॥इहस्ववैश्वानरायप्रदिन्नोज्योतिर्बृह
त्।ॐ ३१मू।आयूः।ज्योतीः।ज्योतीः।३।ज्योतोवाहाइ।ज्योतोवा ३ हाऊ।
वा।इहस्ववैश्वानरायप्रदिन्नोज्योतिर्बृहत्।सहस्तेज आपः।आपः।अ
पः।अपः।आपोवा।आपोवा।आपोवा।आपोवाहा ३ ऊवा॥इहस्व
वैश्वानरायप्रदिन्नोज्योतिर्बृहत्।नतत्ते अग्ने प्रमृषेनिवर्तनां।तनां।

रु॰
९४

तनां। तनां। तनोवा। तनोवा। तनोवा। तनोवाहाइ। तनोवाहाइ। तनो
वाहाइ। तनोवा ३ हाउवा। इहस्य वैश्वानरायप्रदिशोज्योतिर्ब्रहत्। ॐ
३म्। आयूः ३। ज्योती: ३। ज्योतोवा ३। ज्योतोवाहाइ। ज्योतोवा ३ हाउ
वा। इहस्य वैश्वानराय प्रदिशोज्योतिर्ब्रहत्। उषादिशो। ज्योतिः। ज्यो
तिः। ज्योतिः। ज्योतोवा। ज्योतोवा। ज्योतोवा। ज्योतोवाहाइ। ज्योतोवोहा
इ। ज्योतोवा ३ हाउवा। इहस्य वैश्वानरायप्रदिशोज्योतिर्ब्रहत्। यदूरे सान्नि
हा। भुवाः। भुवाः भुवाः। भुवोवा। भुवोवा। भुवोवा। हाइ। भुवोवा ३ हाउवा
इहस्य वैश्वानरायप्रदिशोज्योतिर्ब्रह

१॰

९४

त्। ॐ ३१म्। ॐ ३१म्। ॐ ३१म्। ओयूः। ओयूः। ओयूः। ज्यौतिः। ज्यौतिः।
ज्यौतीः। ज्यौतोवा। ज्यौतौवा। ज्यौतौवा। ज्यौतौवाहोइ। ज्यौतौवाहोइ। ज्यौतो
वा ३ होउ। वो। घैर्मौमरुद्भिर्भुवनेषुचक्रदत्। इडू ईउ २४५॥ ॥समा
भावे योन्यसूक्तं पठेत्। एतच्चोपलक्षणं। तेनान्यदप्याग्नेयादीयथाम्नात्या
पठेत्॥ किंतु एकैकमेव उपादेयगतैकवचनस्य विवक्षितत्वात्॥ एवं च
सोद्गारां विधाय यथाम्नातं पूर्णपात्रविमोकादि कर्मशेषं समापयेदाचा
र्यः। तदनंतरं॥ वरणक्रमेण ऋत्विज उदङ्मुखाः प्राङ्मुख यजमान
हस्ते श्रेयः संपादनं कुर्वंति। तच्चैवं। त्रिवापसंतु इति यजमानहस्ते जलं क्षि
पेत्॥ सौमनस्यमस्त्विति पुष्पं अक्षतं चारिष्टं चास्त्विति यक्षताः। दीर्घमायुः श्रे

रु.
९५

प.

श्रेयः शांतिपुष्टिस्तुष्टिश्चास्त्विति पुनर्जलं। मया भवन्योगेन महारुद्रा
दिमध्ये यथा नयः कृतो जपस्तद्दशांशेनाऽमुकपक्षेण चयः कृतो होमस्त
स्माज्जपाद्धोमाच्च यज्जातं श्रेयस्तत्तुभ्यमहं संप्रददे इति। इदं निर्मूलत्वा
द्यजमानप्रतारणमात्रमेव॥ तदनंतरमग्नेः पश्चिमभागे प्राङ्मुखोप
विष्टो यजमान उदङ्मुखानाचार्यादीन्पूजयित्वा दक्षिणां दद्याद्वरणक्र
मेण॥ तद्यथा॥ अद्येत्यादिकृतस्य महारुद्राख्यकर्मणः सांगतासिध्यर्थं
आचार्यादीन्पूजयिष्ये इति संकल्प्य। श्रीमहारुद्रस्वरूपिणे आचार्येदं
पाद्यमिदं बार्हस्पत्यं वासोयुगुलं इत्यादि गंधापुष्पधूपदीपतांबूलादीनि
दद्यात्॥ पूर्वोक्तविशेषणविशिष्टे देशकाले च कृतस्य महारुद्रादिप्र

९५

तिष्ठासिध्यर्थममुकगोत्रायाऽमुकवेदांतर्गतायाऽमुकशाखाध्यायिनेऽमुक
शर्मणे आचार्याय यथाशक्त्यालंकृतामिमां सवत्सां गां रुद्रदैवत्यां इदं
च हिरण्यमग्निदैवतं तुभ्यमहं संप्रददे इति कुशाक्षतसहितं जलं द्विजह
स्ते निक्षिपेत्। न मम मे ति वदेत्॥ द्विजस्तु स्वस्तीत्युक्त्वा कामस्तुतिं क इदं
कस्मा अदादित्यादिकां यथाशाखस्थां पठेत्। क इदं कस्मा अदात्का
मः कामायादात्कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविशका
मेन त्वा प्रतिगृह्णामि कामैतत्ते। वृष्टिर्द्यौस्त्वा ददातु। पृथिवी प्रतिगृ
ह्णातु। एवं ब्रह्मपूजां विधाय। अनंतरं ग्रहजापकेभ्यो ग्रहदक्षिणा देया॥
तद्यथा॥ कपिले सर्वभूतानां पूजनीयासि रोहिणि। सर्वदेवमयी यस्मा

दतः शांतिं प्रयच्छमे इति सूर्याय गां ॥ पुण्यस्त्वं सर्वपुण्यानां मंगलानां
च मंगलं ॥ विष्णुना विधृतो नित्यमतः शांतिं प्रयच्छमे ॥ इति सोमा
य शंखं ॥ धर्मस्त्वं वृषरूपेण जगदानंदकारक ॥ अष्टमूर्त्तेरधिष्ठान
मतः शांतिं प्रयच्छमे ॥ इति भौमाय वृषभं ॥ हिरण्यगर्भगर्भस्थं हेम
बीजं विभावसोः । अनंतपुण्यफलदमतः शांतिं प्रयच्छमे ॥ इति बुधा
य सुवर्णं ॥ पीतं वस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं ॥ प्रदानात्तस्य मे वि
ष्णुमतः शांतिं प्रयच्छमे ॥ इति गुरवे पीतवाससि । विष्णुस्त्वमश्वरूपेण
यस्मादमृतसंभवः ॥ चंद्रार्कवाहनो नित्यमतः शांतिं प्रयच्छमे । इति
शुक्राय श्वेताश्वं । यस्मात्त्वं पृथ्वीवी सर्वाकधेनुकेशवसंभवः ॥ सर्वपा

पहरानित्यमतः शांतिं प्रयच्छमे ॥ इति शनये कृष्णां गां ॥ यस्मात्त्वं सर्वक
र्माणि तवाधीनानि सर्वदा ॥ हलार्गलायुधादीनि मतः शांतिं प्रयच्छमे ॥ इ
ति राहवे आयसं ॥ यस्मात्त्वं सर्वयज्ञानां मंगले न प्रकीर्तितः ॥ यानं विभा
वसोर्नित्यमतः शांतिं प्रयच्छमे ॥ इति केतवे गं ॥ एतत्सर्वं दत्त्वा गुणं ॥ आयं
दक्षिणा मुख्यः पक्षः । यद्वा सर्वेभ्योपि दद्या वा गावः ॥ एवं दक्षिणां दद्यात् ॥
यद्वा सर्वेभ्यः सुवर्णमेव ॥ अशक्तौ गाव्या रत्नानि भूमिरित्यप्यधिका दक्षिणा
। यस्माद्धुत्यं गायनेकेतवस्यशिवस्य च ॥ गाव्यामयाप्यभूत्यास्त्वद्याज
न्मनि जन्मनि तिदत्वा गाव्या । यथा रत्नेषु सर्वेषु सर्वे देवाः प्रकीर्तिताः ॥ न
था शांतिं प्रयच्छंतु रत्नदानेन मे सुरा इति रत्नानि ॥ यथा भूमिप्रदानस्य

रु॰
८७

कलशान्ताहैर्निषोडशी॥ दानान्यन्यानिशक्तोनिर्मे भूमिदानाद्भवेदिह। इ
ति भूमिः। एवंब्रह्मादिभ्यो दक्षिणां दत्वा तदनंतरं ऋत्विजोपि पूजयि
त्वा संकल्पपूर्वकं दक्षिणां दद्यात्। यथाशक्त्याचार्यादिभ्यो ऽलंका
रमुद्रिकोदकपात्रोपानद्व्यजनं छत्रचामरादिन्युपकरणानि दद्यात्
॥ गोरभावे तं निष्क्रयस्तेनाःद्वैतदद्वैवा सुवर्णं शक्त्या दद्यात्॥ ततो द्वा
रजापकेभ्योपि दक्षिणादेया॥ ततो नानावेदांतर्गत नानाशाखाध्या
यिभ्यो नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्योदीनानाथेभ्यः धर्मपु
भ्यो यथाशक्ति भूयसीं दक्षिणामुत्सृज्येत्तमेमेतिसकृद्दशतजन्मेषि
स्ता॥ ॐ तत्सदिति वदेत्॥ तदनंतरं वेदीसमीपस्थकलशोदकेनरु

प॰
८७

द्रकलशोदकेन द्वारकलशोदकेन च दूर्वापल्लवैरुदङ्मुखाचार्यर्त्विजस्ति
ष्ठंतः प्राङ्मुखं संस्थितं यजमानभिषिंचेयुः॥ अभिषेके पत्नि वामभागे
॥ अभिषेकसमये गीतवाद्यादि मंगलतूर्यघोषकार्यः। समुद्रज्येष्ठा इति
चतसृणां वशिष्ठ आपस्त्रिष्टुप्। अभिषेके विनि॰॥ ॐ समुद्रज्येष्ठाः
सलिलस्य मध्यात्पुनानायंत्सनिविशमानाः॥ इंद्रोयावज्री वृषभोर
राद ता आपो देवीरिह मामवंतु। या आपो दिव्या उतवास्रवंति खनि
त्रिमा उतवायाः स्वयंजाः। समुद्रार्था याः शुचयः पावकास्ता आपो
देवीरिह मामवंतु। यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यंज
नानां॥ मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवंतु॥

रु॰ ९९

यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्ज्जंमदंति।वैश्वानरोयाः
स्वग्निःप्रविष्टस्ता आपोदेवीरिहमामवंतु॰ त्रायंनाभिमितितिसृणा
ससऋषय आपोनुष्टुप्॥ अभिषेके॰॥ त्रायंनाभिहदेवाः॰।इमा
आपइतितिसृणांससंऋषय आपोनुष्टुप्। अभिषेकेवि॰।इमा
आपःशिवतमाःसर्वस्य॰।देवस्यत्वासवितुःप्रसवेश्विनोर्बाहु
भ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्य्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिं
चामि॥बलायश्रियैयशसेनाद्याय।भूर्भुवःस्वः अमृताभिषेकोस्तु
॥अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांचिबुकादधि।यक्ष्मंशीर्षण्यंम
स्तिष्काज्जिह्वायाविवृहामिते।ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्यो

प॰

९९

अनूक्यात्॥यक्ष्मंदोषण्य१मंसाभ्यांबाहुभ्यांविवृहामिते।अंत्रेभ्यस्तेगु
दाभ्योवनिष्ठोर्हृदयादधि।यक्ष्मंमतस्नाभ्यांयक्नःप्लाशिभ्योविवृहा
मिते।ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां।यक्ष्मंश्रोणिभ्यांभा
सदाद्भंससोविवृहामिते।मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः॥य
क्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते॥अंगादंगाल्लोम्नोलोम्नोजातंप
र्वणिपर्वणि।यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते॥एतेस्वमंत्रास्ते
कमंत्राध्याहाः॥ पौराणिकास्तु॥ ॥सुरास्त्वामभिषिंचंतुब्रह्मावि
ष्णुमहेश्वराः॥वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः॥प्रद्युम्न
श्चानिरुद्धश्चभवंतुविजयायते॥आखंडलोग्निर्भगवान्यमोवै

मे

निर्ऋतिस्तथा॥ वरुणः पवनश्चैव धनध्यक्षस्तथा शिवः॥ ब्रह्मणास
हिताः सर्वे दिक्पालाः पांतुते सदा॥ कीर्तिर्लक्ष्मी धृतिर्मेधा पुष्टिः श्रद्धा
क्रियामतिः॥ बुद्धिर्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च मातरः॥ एता
स्त्वामभिषिंचंतु देवपत्न्याः समागताः॥ आदित्यश्चंद्रमा भौमो बुध
जीवसितार्कजाः॥ ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः॥ देव
दानवगंधर्वा यक्षराक्षसपन्नगाः॥ ऋषयो मुनयो गावो देवमातर एव
च॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ अस्त्राणि सर्वशास्त्रा
णि राजो वाहनानि च॥ औषधानि च रत्नानि कालश्चावयवाश्च ये॥
सरितः सागराः शैलाः स्तीर्थानि जलदा नदाः॥ एते त्वाममभिषि

चंतु सर्वकामार्थसिद्धये॥ ७॥ ग्रहाणामादिरादित्यो लोकरक्षणका
रकः॥ विषमस्थानसंभूतां पीडां दहतु ते रविः॥ १॥ रोहिणीशः सुधामू
र्तिः सुधामात्रः सुधाशनः॥ विषमस्थानसंभूतां पीडां दहतु ते विधुः॥ २॥
भूमिपुत्रो महातेजा जगतां भयकृत्सदा॥ वृष्टिकृद्वृष्टिकर्ता च पीडां
दहतु ते कुजः॥ ३॥ उत्पातरूपो जगतां चंद्रपुत्रो महाद्युतिः॥ सूर्यप्रि
यकरो विद्वान् पीडां दहतु ते बुधः॥ ४॥ देवमंत्री विशालाक्षः सदा लो
कहिते रतः॥ अनेकशिष्यः संपूर्णः पीडां दहतु ते गुरुः॥ ५॥ दैत्यमंत्री
गुरुस्तेषां प्राणदश्च महामतिः॥ प्रभुस्ताराग्रहाणां च पीडां दहतु ते
भृगुः॥ ६॥ सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः॥ मंदचारः प्र

रु॰
९०

सन्नात्सापीडांदहतुनेश्वानिः॥७॥महासेनोमहावच्चोदीर्घदंष्ट्रोम
हाबलः॥अतनुश्चोर्ध्वकेशश्चपीडांदहतुनेनमः॥८॥अनेकरूप
वर्णैश्चशतशोथसहस्त्रशः॥उत्पातरूपोजगतःपीडांदहतुनेशिखी
॥९॥तच्छंयोरावृणीमहे॥एवमभिषेकानंतरंसर्वौषधीभिरंगमनु
लेलिप्यशुद्धोदकेनस्नात्वाशुक्लमाल्यांबरानुलेपनधरःसतपत्नी
कोयजमानोग्रहपीठदेवतानांरुद्रपीठदेवतानांचगंधाद्युपचारैरु
त्तरपूजांदक्षिणानमस्कारांतांनिर्वर्त्यपुष्पांजलिंदत्वा॥आवाहनं
नजानामिनजानामिविसर्जनं॥पूजांचैवनजानामिक्षमस्वपर
मेश्वरः॥अपराधसहस्राणिक्रियंतेहर्निशंमया॥दासोहमिति

प॰
९०

मांसत्वाक्षमस्वपरमेश्वरः॥यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रि
यादिषु॥न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं॥मंत्रहीनंक्रिया
हीनंभक्तिहीनंसुरेश्वर॥यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे॥द्वयोः
समाप्य॥उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे॥उपप्रयंतुमरुतःसुदा
नवइंद्रप्राशूर्भवासचा॥अभ्यारमिदद्रयोनिषिक्तंपुष्करेमधु॥अ
वनस्यविसर्जने॥यांतुदेवगणाःसर्वेपूजामादायपार्थिवीं॥इष्टका
मप्रसिद्ध्यर्थंपुनरागमनायचेति॥न्यूनातिरिक्तानिपरिस्फुटानिया
नीहकर्माणिमयाकृतानि॥क्षमानिचैतानिममक्षमस्वप्रयाहितुष्टः
पुनरागमाय॥पुष्पाक्षतप्रक्षेपेणग्रहपीठदेवताविसर्जे॥एव

मेवरुद्रपीठदेवतांविसर्जयेत्॥ग्रहपीठंपूजोपस्करयुतंआचार्या
यदत्वा॥रुद्रपीठमपिसोपस्करंरुद्रप्रतिमांचोचार्यायदत्वा।तत्रप्रति
मादानेमंत्रः॥रुद्रप्रतिमांसुवर्णमयींवस्त्रयुगाधियुतां॥श्रीरुद्रप्रीतये
चापिमयाप्राप्तानिवृत्तये॥प्रार्थिताभिष्टसंसिध्यैतुभ्यंश्रीरुद्ररू
पिणे॥संप्रदद्याविधानेनयथोक्तफलमस्तुमे।यद्यातुमरकतलिंगंत
त्रदानमंत्रः॥इदंमारकतंलिंगंरौप्यपीठसमन्वितं॥नदीनाराजतेना
पिश्वेतवस्त्रयुगान्वितं॥धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वितं॥सं
प्रदद्याद्विधानेनयथोक्तफलमस्तुमे॥काश्मीरलिंगपक्षेतुइदंमार
कतमित्यत्रेदंकाश्मीरजमितिप्रयोज्यं॥द्वादशधान्यानितु॥व्रीहियव

माषतिलमुद्गखल्वगोधूममसूरप्रियंगवमेणवश्यामाकनीवाराः॥तेषां
मानंतुप्रस्थाऽधिकंद्रोणोवा।यथाशक्तियाह्याः।उक्तधान्याभावेय
थासंभवंवायाह्याणि॥ततोग्निंसंपूज्य॥सर्वामंडपदेवताद्वारदेवता
श्च॥यांतुदेवगणाःसर्वेइतिविसृज्यध्वजपताकाद्युपचारयुतंमंड
पमाचार्यायदद्यात्॥अमुंमंडपंध्वजपताकाद्युपचारयुतंतुभ्यमहं
संप्रददे॥स्वस्तीतिब्रूयात्॥ततःकृतस्याऽमुककर्मणःसंपूर्णतासि
द्ध्येयथोपपन्नेनान्नेनयथाकालंब्राह्मणान्भोजयेत्॥लघुरुद्रे
एकादश ११॥महारुद्रेएकविंशत्यधिकशतं॥१२१॥अतिरुद्रेण
देवेकादशगुणंत्रयोदशशतान्येकत्रिंशच्छति॥लक्षहोमेपिय

ग. १२

थाकालंयथापक्वान्नेन॥ उत्तमपक्षेसहस्रयधिकद्विजानसंख्याकान्॥
मध्यमपक्षेनवतिसंख्याकान् ८९॥ कनिष्ठपक्षेनवसंख्याकान्॥ ब्रा
ह्मणान्भोजयिष्येइतिसंकल्प्पयथाकालंभोजयेत्॥ ततःब्रह्मार्पणं
ब्रह्महवि०॥१॥ चतुर्भिश्चचतुर्भिश्चेसकृत्का॥ मयायत्कृतंयथाकालं
यथाज्ञानंयथाशक्तिचअमुककर्मतत्कालहीनंभक्तिहीनंचभवतां
ब्राह्मणवचनाच्छ्रीमहारुद्रप्रसादात्सर्वंसंपूर्णं। अछिद्रंचास्तुइति
प्रार्थयेत्॥ ततःसंपूर्णमस्त्वछिद्रमस्त्विति सर्वेवदेयुः॥ ततोस्तेषांमं
त्राक्षिताग्रहीत्वातान्सानुनयंविसृज्यब्राह्मणान्भोजयेत्॥ दीनानाथा
श्चान्नादिनासंतोष्यस्वयंसुहृन्मित्रादियुतःसोत्साहसंतुष्टोहविष्यं

प० १२

तुभुंजंतेति॥ सुतउवाच॥ वैशंपायनमासीनमपृच्छच्छौनकःपुरा॥ सर्वकामा
प्तयेनित्यंकथशांतिकपौष्टिकं॥ वैशंपायनउवाच॥ श्रीकामःशांतिका
मोवाग्रहयज्ञंसमाचरेत्॥ वृष्ट्यायुःपुष्टिकामोवातथैवाभिचरन्पुनः॥ येन
ब्रह्मन्विधानेनतन्मेनिगदतःशृणु॥ सर्वशास्त्राण्यनुक्रम्यसंक्षिप्यग्रंथवि
स्तरं॥ ग्रहशांतिमथोवक्ष्येपुराणश्रुतिचोदितं॥ पुण्येन्हिविप्रकथितेकृत्वाब्रा
ह्मणवचनं॥ ग्रहान्ग्रहाधिदेवाँश्चस्थाप्यहोमंसमाचरेत्॥ ग्रहयज्ञस्त्रिधा
प्रोक्तःपुराणश्रुतिकोविदैः॥ प्रथमोयुतहोमःस्याल्लक्षहोमस्ततःपरं
॥ तृतीयःकोटिहोमस्तुसर्वकामफलप्रदः॥ अयुतेनाहुतीनांचनवग्रह
मखःस्मृतः॥ तस्यतावद्विधिंवक्ष्येपुराणश्रुतिभाषितं॥ तत्रायुतहो

मप्रकारः॥श्रीकामादिप्रश्नास्तेस्यानुकूलेशुभलग्नादौसुस्नातःप्रक्षालि
तपाणिपादः आचांतोयजमानः कृतमांगलिकदेशाकालौसंकीर्त्य॥
अमुककामोयुतहोमेनाहंयक्ष्यइतिसंकल्प्य। अथलक्षहोमः॥कथि
तोयुतहोमोयंलक्षहोममतःशृणु॥सर्वकामाश्रयेयस्माल्लक्षहोमंवि
दुर्बुधाः। पितॄणांवल्लभोयस्माद्भुक्तिमुक्तिफलप्रदः॥अस्माद्बहुगु
णःप्रोक्तोलक्षहोमःस्वयंभुवा॥आहुतीभिःप्रयत्नेनदक्षिणाभिस्तथै
वच॥आहुतिभिस्तथान्नेनेत्यपियातः॥एवंगुणेयादिअमुककामोल

क्षहोमेनाहंयक्ष्ये॥नकुर्याद्दक्षिणाहीनंवित्तशाठ्येनमानवाः॥अदत्त्वा
मोहलोभाद्वाकुलक्षयमवाप्नुयात्॥अन्नदानंयथाशक्त्यादातव्यंभूति

मिच्छता॥अन्नहीनःकृतोयस्माद्दुर्भिक्षफलदोभवेत्॥अन्नहीनोदहेद्राष्ट्रं
मंत्रहीनस्तुऋत्विजः॥अदक्षिणोपियष्टारंनास्तियज्ञसमोरिपुः॥न
चाप्यल्पधनःकुर्याल्लक्षहोमांतरःक्वचित्॥तस्मात्पीडाकरोनित्यंय
त्रभवतिग्रहः।तमेवंपूजयेद्भक्त्याद्वौवात्रीन्वायथाविधि॥एवमप्यर्च
येद्भक्त्याब्राह्मणंयज्ञपारगं॥दक्षिणाभिःप्रयत्नेनबहून्वाबहुवित्तवा
न्॥लक्षहोमस्तुकर्तव्योयथावित्तंभवेद्गृहे॥यतःसर्वानवाप्नोतिकुर्व
न्कामान्विधानतः॥पूजयेच्छिवलोकेचवस्वादित्यमरुद्गणैः॥यावत्क
ल्पशतान्यष्टावथमोक्षमवाप्नुयात्॥सकामोयस्त्विमंकुर्याल्लक्षहो
मंयथाविधि॥सर्वान्कामानवाप्नोतिपदंचानंतमश्नुते॥पुत्रार्थील

रु॰
९४

भतेपुत्रं॥ धनार्थीलभतेधनं॥ भार्यार्थीलभते भार्यांकुमारीचशुभंपतिं
॥ भ्रष्टराजस्तथाराज्यंश्रीकामः श्रियमाप्नुयात्॥ यंयंप्रार्थयतेकामं
तंतंप्राप्नोतिपुष्कलं निष्कामः क्रियतेयस्तु परंब्रह्माधिगच्छति॥ ॥
इतिलक्षहोमविधिः॥ अथकोटिहोमः॥ तत्रमात्स्ये॥ ॥ अस्माच्छतगु
णः प्रोक्तः कोटिहोमः स्वयंभुव॥ आहुतीभिस्तथान्नेनदक्षिणाभिः फ
लेनच॥ पूर्ववद्ग्रहदेवानामावाहनविसर्जनं॥ होममंत्रास्तएवोक्ताः स्नान
दानेनतथैवच॥ कुंडमंडपवेदीनांविशेषोयंनिबोध्यमे॥ कोटिहोमेचतु
र्हस्तंचतुरस्रंचसर्वतः॥ योनिवक्त्राद्वयोपेतंतदप्याहुस्त्रिमेखलं॥
एवंगुणेत्यादि अमुककामोकोटिहोमेनाहंयक्ष्ये॥ अनेनविधिनाय

प॰

९४

स्तुकोटिहोमंसमाचरेत्॥ सर्वान्कामानवाप्नोतिततोविष्णुपदंव्रजेत्
यः पठेच्छृणुयाद्वापिग्रहयज्ञांतित्रयंनराः॥ सर्वपापविशुद्धात्मापदमिंद्रः
सगच्छति॥ अश्वमेधसहस्राणिदत्त्वाचाष्टौचधर्मवित्॥ कृत्वानत्फलमा
प्नोतिकोटिहोमंतदश्नुते॥ ब्रह्महत्यासहस्राणिभ्रूणहत्यार्बुदानिच
नश्यंतिकोटिहोमेनयथावच्छिवभाषितं। कोटिहोमः प्रकर्तव्योयदा
वित्तंभवेद्बहु। सर्वानर्थानवाप्नोतिकुर्वन्कामान्विधानतः॥ पूज्यतेशि
वलोकेच वस्वादित्यमरुद्गणैः॥ यावत्कल्पशतान्यष्टावथमोक्षम
वाप्नुयात्॥ सकामोयस्त्विमंकुर्यात्कोटिहोमंयथाविधि॥ तंसकाम
मवाप्नोतिपदंचानंत्यमश्नुते॥ पुत्रार्थीलभतेपुत्रानित्यादिलक्षहोम

वत्॥ ॥तथाग्रहयज्ञत्रयं कुर्याद्यस्त्वज्ञाद्येन मानवः॥ न तस्य ग्रह
पीडा स्यान्न च बंधुजनक्षयः॥ ग्रहयज्ञत्रयं गेहे लिखितं यस्य तिष्ठति।
न तत्र पीडा पापानां न रोगो नैव बंधनं॥ अशेषयज्ञफलदमशेषाघौ
घनाशनं॥ कोटिहोमं विदुः प्राज्ञा भुक्तिमुक्तिफलप्रदं॥ अश्वमेधस
मं प्राहुर्लक्षहोमं सुरोत्तमाः॥ द्वादशाहसमस्त्वन्यो ग्रहमखः स्मृतः॥
इति कथितमिदानीमुत्सवानंदहेतुः सकलकलुषहारी देवयज्ञा
भिषेकः॥ परिवदति य इत्थं यः शृणोति प्रसादादभिभवति सशत्रून्ना
युरारोग्ययुक्तः॥ इति कोटिहोमविधिः॥ ॥अत्रापि लक्षहोमवद्दे
वानुष्ठानं॥ यदा तु शीघ्रं समापयितुमिच्छति तदा होत्राष्टहोमकर्तपे

क्षया अधिका अपि यथेच्छं वरीतव्याः॥ अत्रापि गरुत्मता सह त्रय
स्त्रिंशद्देवताः पूज्याः॥ कुंडवेदिकयोरुक्त एव विशेषः कार्यः॥ होम
स्तद्दैव। व्याहृत्सो हुतयस्त्क कोटिमिता होतव्याः॥ दक्षिणा तु लक्ष
होमाच्छतगुणा सहस्रं धेनवः॥ सहस्रसंख्या इत्यादि दानमंत्रास्त
एवा यद्वा सहस्रं गावः सुवर्णभूषिताः सूर्यादि सर्वोद्देशेन देयाः मं
त्र उक्त एव॥ अथवा सर्वेभ्यः सुवर्णं दद्यात्॥ रत्नादिदानं पूर्ववत्॥
ब्राह्मणभोजनमयुतहोमात्सहस्रगुणं॥ अन्यत्सर्वं लक्षहोमव
त्स्वेयम्॥ ॥इति श्रीमद्यज्ञोपवीताभिधानं श्रीविश्वनाथसूनुना
दीक्षितानंतेन विरचिता सर्वोपकाराय सर्वसंग्रहरुद्रानुष्ठानत्रि

रु.
१६

विधाग्रहमखपद्धतिः समाप्तः॥ ॥श्रीरस्तु॥ ॥यादृशं पुस्त
कं। दृष्ट्वा तादृशं लिखीतं मया॥ यदि शुद्धमशुद्धं वा मम दोषो न वि
द्यते॥१॥ ॥हस्ताक्षर गोपाळ रामकृष्ण भट उपनाव ठोंबरे जोसिक
ज्बेदेवळालि हल्लिवास्ति गोरेगाव श्रीगोरेश्वर सन्निध रुपद्र पद्धति स
माप्तं॥ शाके १७५९ ईश्वरनाम संवत्सरे चैत्रमासे कृष्णपक्षे तिथौ
७ गुरुवारे त्रितीयप्रहरी संपूर्णमस्तु॥ शुभं भवतु॥ श्रीरस्तु॥ ॥
हे पुस्तक बापुगुरु वज्बे पाराशार यांचे असे॥ ७ ॥ ७ ॥ ७॥
॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥

पु.
१६

श्रीगोपीजनवल्लभायनमः

मंत्राक्षता


॥ ॐ अध्यो दिंद्रं प्रास्थितं माहवींषिच नो दधिष्व पच्यतोत सोमं ॥
॥ प्रयस्वंतः प्रतिहर्या मसित्वा सत्या संतु यजमानस्य कामा ॥
॥ अपश्यंत्वा मनसा चेकितानं तपसो जातं तपसो विभूतं ॥
॥ इह प्रजा मिह रयिं रराणः प्रजाय स्वप्रजयां पुत्रकाम ॥
॥ अपश्यंत्वा मनसा दीध्यानां स्वायां तनूऋत्वे नाधमानां ॥
॥ उपमा मुच्या युवतिर्बभूयाः प्रजाय स्वप्रजयां पुत्रकामे ॥
॥ शतं जीव शरदो वर्धमानः शतं हेमंतान् शतमुवसंतान् ॥
॥ शतमिंद्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥

॥ सहस्त्रमाख्या अदधात् शतं प्रति गरिज एते चैवासने श्वेतश्वाश्वतरी रथो होतुः पुत्र कामाहाप्या रख्या पयेरन् लभंतेह पुमान् लभंतेह पुमान् ॥

॥ श्रीवर्चस्व मायुष्य मारोग्य माविधात् पवमानं महीयते धनं धान्यं पशुं बहुपत्रलाभं शत संवत्सरं दीर्घमायुः ॥

स्वस्ति मंत्रार्थाः सफलाः संतु ॥

श्री. द.भा. काळे.



श्री

मंगल धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभं कुमारं शक्तिहस्तं च
मंगलं प्रणमाम्यहं॥ देवानां च ऋषीणां च गुरुं कांचनसं
निभं बुद्धिभूतं त्रिलोकेशं तं गुरुं प्रणमाम्यहं॥ हिमकुंदमृणा
लाभं दैत्यानां परमं गुरुं सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहं
नीलांजनसमाभासं रविपुत्रं यमाग्रजं छायामार्तंडसंभूतं
तं नमामि शनैश्चरं अर्धकायं महावीर्यं चंद्रादित्यविमर्दनं
सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहं॥ पलाशपुष्पसंका
शं तारकाग्रहमस्तकं रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहं

बुधं । प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधं सौम्यं सौम्यगुणो
पेतं तं बुधं प्रणमाम्यहं ॥ रवि ॥ जपाकुसुमसंकाशं काश्यपेयं
महद्युतिं तमोऽहं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरं
दधिशंखतुषाराभं क्षीरोदार्णवसंभवं नमामि
शशिनं सोमं शंभोर्मुकुटभूषणं ॥ सोम

॥ ५ ॥ रुद्रपद्धतिसमाप्तः पत्रसंख्या ॥ ५ ॥

१७

१८

[OrderDescription]
,CREATED=19.08.19 15:45
,TRANSFERRED=2019/08/19 at 16:14:08
,PAGES=106
,TYPE=STD
,NAME=S0001502
,Book Name=M-748-RUDRAPADHATI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF

FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF

FILE106=00000106.TIF
,